आरण्यकम् (XXI /2)  सितम्बर 2014 ISSN 0975 - 0061
अर्धवार्षिकं संस्कृतशोधपत्रम्  आर.एन.आई. सं.58951/94

## संस्कृतप्रसारपरिषद्, आरा

### प्रकाशनम्

1. मेघदूतम् (सभूमिका-हिन्दीपद्यानुवादसहितम्)
   - स्व. पण्डित कमलाकान्त उपाध्यायः
   15 रूप्यकाणि
2. भोजपुरी नीतिसतक (भर्तृहरि 'नीतिशतक'स्य भोजपुरी-पद्यानुवादः)
   -श्री देवकुमार मिश्रः 'अलमस्त'
   15 रूप्यकाणि
3. पण्डित दीनदयाल उपाध्याय के 'एकात्ममानवदर्शन' की मीमांसा
   - श्री नर्मदेश्वर ओझा
   15 रूप्यकाणि
4. माण्डूक्योपनिषद्-'नलिन-भाष्य' - पं. जगदीश्वर प्रसाद मिश्र 'नलिन'
   35 रूप्यकाणि
5. भरतचरितम् (महाकाव्यम्) - स्व. भवानीदत्त शर्मा
   51 रूप्यकाणि
6. राष्ट्रियता : सांस्कृतिक अवधारणा - श्री नर्मदेश्वर ओझा
   51 रूप्यकाणि
7. संस्कृतनिबन्धसञ्चयनम् - पं. व्रजभूषण मिश्र 'आक्रान्तः'
   41 रूप्यकाणि
8. ईशावास्योपनिषद् एवं केनोपनिषद्-'नलिन-भाष्य'
   - श्री जगदीश्वर प्रसाद मिश्र 'नलिन'
   51 रूप्यकाणि
9. आध्यात्मिकनिबन्धसंग्रह - श्री जगदीश्वर प्रसाद मिश्र 'नलिन'
   51 रूप्यकाणि
10. उपेन्द्रविज्ञानदर्शनम् (वेदान्तग्रन्थः) - स्व. पं. उपेन्द्रनारायणदत्त शर्मा
    41 रूप्यकाणि
11. भावनाविलासशतकम् - स्व. पं. उपेन्द्रनारायणदत्त शर्मा
    21 रूप्यकाणि
12. हनुमच्चरितम् - स्व. पं. व्रजभूषणमिश्र 'आक्रान्तः'
    51 रूप्यकाणि
13. उपनिषदों की भूमिका - पं. जगदीश्वर प्रसाद मिश्र 'नलिन'
    51 रूप्यकाणि
14. महाभारतसारसंग्रहः (प्रकाश्यः) - स्व. पण्डित वचन मिश्रः
15. चरितरत्नत्रयी - स्व. पं. व्रजभूषणमिश्र 'आक्रान्तः'
    51 रूप्यकाणि
16. जगन्नाथचरितम् - डॉ. बनमाली बिश्वालः
    60 रूप्यकाणि
17. कृत्-प्रत्ययविश्लेषण - डॉ. गोपबन्धु मिश्रः
    204 रूप्यकाणि

# आरण्यकम्

अर्धवार्षिकं संस्कृतशोधपत्रम्

**संस्कृतप्रसारपरिषद्**
**आरा (विहारः)**

संस्कृतप्रसारपरिषद्, आरा (विहार:)
सरस्वती नः सुभगा मयस्करत्

**एकविंशं वर्षम्, द्वितीयोऽङ्कः**
**सितम्बर 2014**

## 'आरण्यक'स्य नियमाः

1. संस्कृतप्रसारपरिषद्, आरा-पक्षत इदं षाण्मासिकं शोधपत्रं संस्कृतेन चैत्र-आश्विनमासयोः (मार्च-सितम्बर) प्रकाश्यते। वर्षारम्भः चैत्रात् (मार्च तः) मन्यते।
2. ग्राहकत्वं पूर्णवर्षस्यैव स्वीक्रियते। मध्येवर्षं ग्राहकत्वं काङ्क्षतः पूर्णवर्षस्य शुल्कमपेक्ष्यते। तादृशाय ग्राहकाय वर्षस्य पूर्वप्रकाशितोऽङ्क उपलब्धौ सत्यां प्रेषयिष्यते।
3. वार्षिकं शुल्कम् एकशतं (100) रूप्यकाणि। एकस्याङ्कस्य शुल्कम् पञ्चाशत् (50) रूप्यकाणि। शुल्कप्रेषणस्योपायाः-
   (i) **NEFT Banking**
   Bank - Indian Bank, Ara (Bihar)
   IFSC - IDIB000A047
   Name - Sanskrit Prasara Parishad
   Acc. No. - 552203784
   शुल्कं संप्रेष्य तस्य सन्देशसूचना (Message) अत्र देया-
   डॉ. नीलमणि पाठकः, दूरभाषः 09431451895
   (ii) **बैंक ड्राफ्ट 'संस्कृतप्रसारपरिषद्'** इति नाम्ना
   आरा (बिहार) नगरे व्यवहरणीयम्।
   **ड्राफ्ट प्रोषणस्थलम् -** डॉ. नीलमणि पाठकः, गणपति ज्वेलर्स के पीछे, महावीर स्थान, मौलाबाग, आरा (विहार)-802301
   (iii) **धनादेशः** (M.O.) डॉ. नीलमणि पाठकस्य नाम्ना।
4. विमर्शात्मका अनुसन्धानात्मकाश्च शास्त्रीया अप्रकाशितपूर्वा उच्चस्तरीया गम्भीराश्च मौलिका निबन्धाः प्रकाशनाय गृह्यन्ते।
5. काव्य-नाटक-चरित्रवर्णन-व्यङ्ग्य-हास्यसम्बद्धा नव्या रचना अत्र स्थानं न लभन्ते।
6. प्रकाशनाय प्रेषिताः सर्वविधा रचनाः शुद्धा एकस्मिन् पत्रपृष्ठे सुस्पष्टाक्षरैः लिखिताः टङ्किता वा स्युः। रचनाऽन्ते रचयितुः आवाससङ्केतः पदनिर्देशश्च उल्लिखितौ स्याताम्।
7. प्रकाशितसंस्कृतकाव्यनाटकाऽऽलोचनादिग्रन्थानां समीक्षार्थं सम्बद्धग्रन्थस्य प्रतिकृतिद्वयं सम्पादकं प्रति प्रेषणीयम्।
8. लेखकेभ्यः तत्प्रकाशितलेखानां पञ्च प्रतिरूपाण्यपि दीयन्ते।
9. लेखानां प्रकाशनस्य सम्पादनस्य च सर्वाधिकारः सम्पादकाधीनः।
10. 'आरण्यक'सम्बद्धः लेखप्रकाशनसमीक्षादिविषयकः सर्वविधपत्रव्यवहारः **प्रो. गोपबन्धु मिश्रः, अध्यक्षः, संस्कृतविभागः, काशी हिन्दू विश्व-विद्यालयः, वाराणसी-221005 इति सङ्केतेन** दूरभाषः-0542-2310561, (चलः) 09450870788 विधेयः।
    Email-gopabandhuh@gmail.com

# आरण्यकम्

संस्कृतप्रसारपरिषदः अर्धवार्षिकं शोधपत्रम्

वर्षाङ्कौ - एकविंशं वर्षम्, द्वितीयोऽङ्कः

आश्विनः, वि.सं. २०७१

सितम्बर, २०१४

**प्रतिवर्षं प्रकाशनकालः**
**चैत्रः, आश्विनः - विक्रमाब्दः**
**मार्च, सितम्बर**

प्रत्यङ्कम् - ५० रूप्यकाणि
संयुक्ताङ्कः - १०० रूप्यकाणि
वार्षिकं शुल्कं १०० रूप्यकाणि

## परामर्शदात्री समितिः

डॉ. हरिहर झा, दरभङ्गा
डॉ. उमाशङ्कर शर्मा 'ऋषिः', पटना
डॉ. भागीरथ त्रिपाठी 'वागीशः शास्त्री', वाराणसी
डॉ. राय अश्विनी कुमारः, बोधगया

⊛

संस्थापकः
**स्व. पण्डित व्रजभूषण मिश्र 'आक्रान्तः'**

⊛

सम्पादकः
**प्रो.गोपबन्धु मिश्रः**
संस्कृतविभागाध्यक्षः
काशी हिन्दू विश्वविद्यालयः, वाराणसी
भूतपूर्वः अतिथ्यध्यापकः (संस्कृतम्)
सोर्बोन नोवेल विश्वविद्यालयः, पारिस (फ्रान्स)

⊛

सह-सम्पादकः
**डॉ. सुनीलकुमार प्रधानः**
Email-sunilkumarp435@gmail.com

⊛

प्रकाशिका
**संस्कृतप्रसारपरिषद्**
रामेश्वरलीलासदनम्
महावीरस्थानम्
मौलाबाग, आरा (विहारः) 802301

⊛

संस्कृतप्रसारपरिषद्, आरा पक्षतः प्रो. गोपबन्धु मिश्रेण, दी महावीर प्रेस, बी.20/44, भेलूपुर, वाराणसी इत्याख्ये मुद्रणालये मुद्रितं प्रकाशितं च।

**प्रो. गोपबन्धु मिश्रः**
सम्पादकः

# सम्पादकीयम्

शास्त्रं शिक्षणम् आचारः प्रयोग इत्येते सहावस्थायिनो विषयाः। किमपि शास्त्रं शिक्षणपरम्परामनाश्रित्याग्रे नैव प्रसरति। तथा हि किमपि लौकिकं शिक्षणं शास्त्रमनादृत्य लोकहिताय न प्रवर्तते। एवमेव लौकिकाः सर्वविधाः आचाराः व्यावहारिकाः प्रयोगविधयश्च शास्त्रमनुगच्छेयुरिति भारतीया काचित् पारम्पारिकता विद्यते। अत एव पितामहात् नाट्यवेदं सम्यग् विदित्वा भरतमुनिर्न केवलं नाट्यशास्त्रं विरचयामास अपि तु पिता-महस्याज्ञयैव नाट्यप्रयोगविधीन् स्वस्य पुत्रान् अध्यापयमास–

**आज्ञापितो विदित्वाहं नाट्यवेदं पितामहात्।**
**पुत्रानध्यापयामास प्रयोगं चापि तत्त्वतः।।** नाट्यशास्त्रम् १/२५

ऋषिर्भरतो न केवलमार्षं शास्त्रं प्रणिनाय, अपि तु तस्य प्रयोगविधिपोषणाय स्वपुत्राणां कृते अपि आचार्यत्वं स्वीचकार। तत्र 'स प्रयोगम् अध्यापयामास' इत्यत्र वैशिष्ट्यं नाम शास्त्रज्ञानं कियद् बलवद् भवतु, तदपेक्षया तस्य प्रायोगिकः पक्षः सर्वथा बलवत्तरः स्थास्यतीति। अत एव 'आचारे नियमः' इति वार्तिकं व्याख्याय महर्षिः पतञ्जलिः शब्दप्रयोगकाले शब्दानुशासनम् अवश्यम् अनुसर्तव्यमिति अनुबभूव। अस्येदमत्र तात्पर्यं यत् शब्दस्य ज्ञानप्रसङ्गे 'गो'शब्द इव गावी-गोणी-गोता-गोपोतलिकेत्यादयोऽ-पशब्दाः ज्ञानभूमौ प्रविशन्तु नाम, किन्तु 'गो' शब्दस्य आचारप्रसङ्गे प्रयोगविधौ वा नूनमेव केवलं शब्देन तेन प्रवर्तितव्यम्, न तु अपशब्देन। एतमेव प्रमाणयन्तीव गीतोक्तिरियं प्रवर्तते–

**तस्याच्छास्त्रं प्रमाणं ते कार्याकार्यव्यवस्थितौ।** (गीता १६/२४)

तत्र कार्यव्यवस्थायाम् अकार्यव्यवस्थाविषये वा शास्त्रमेव प्रमाणं भवति न तु लोको लौकिकस्तर्को वा। अत्रेदमपि पुष्टं भवति यत् लोके यावन्ति कार्याणि भवन्ति तत्र प्रामाण्यं शास्त्रेणैव विनिश्चेतव्यमिति। एतेन कारणेन काव्यप्रणयनविधिः कदाचित् स्वान्तःसुखाय प्रवर्ततां नाम, काव्यशास्त्रं काव्यप्रयोगविधौ प्रामाण्यं पुरस्कर्तुमभिवर्तते। तथैव नाट्यं भिन्नरुचीनां लोकानामेकमद्वितीयसमाराधनरूपेण रचितमस्तु नाम, नाट्यशास्त्रं तु नाट्यप्रयोगविधेः प्रामाण्यं विनिश्चिनुयात्। शब्दाः शुद्धा अशुद्धा वा कियन्तः उच्यमानाः वाचनिकाः सन्तु नाम, ग्रन्थलेखनकाले, सूचना-पत्राचार-कार्यालयादि-प्रसङ्गेषु प्रयोगविधौ तैः शुद्धैः साधुभिर्वा शब्दैः भवितव्यमेव। अतः मार्गप्रान्ते 'कृपया' इत्यस्य स्थाने 'कृप्या', प्रवेशद्वारे 'अनधिकार' स्थाने 'अनाधिकार', सूचनापट्टे 'सुचना' इत्यादिप्रयोगकाले प्रयोक्तुः पदपदवीप्रतिष्ठापरिचयादि कारणमभूत्वा प्रामाणिकाः शाब्दिकाः

कोषग्रन्था वा प्रमाणानि भवन्ति चेत् तत्रन्या: सामाजिका: सभ्या: स्वभाषागौरवाभिमानिनो वेति विनिश्चीयते। विमानानि कियदुच्चम् उड्डीयमानानि भवन्तु नाम विमानपत्तने भूमाववतरणावस्थायां तेषामध: भूमिसंसृतियोग्यै: चक्रै: भवितव्यमेव। मनसा कियता चञ्चलेन दुर्वासनाध्युषितेन स्थीयतां नाम, वचसा संयतेन निस्सर्तव्यमेव, कर्मणा, तन्नाम लेखन-समीक्षण-संशोधानादिविधिना, अतीव मार्जितेन संस्कारयुक्तेन सावधानेन वा भवितव्यमेव। यद्यपि यादृशी मानसिकी भावना तादृशं वच: तथाविधं च कर्म भवति, तथापि लेखन-शब्दादिप्रयोगरूपं कर्म सर्वादौ सर्वथा च पुरत: स्वप्रकाशेन सम्यग् असम्यग् वा प्रभावं जनयति,किं च मुखात् नि:सृतं वच: श्रोतु: मनसि सन्तोषं परितापं वा उत्पादयति, मनोगता भावनैव तत्तद्वचसि तत्तत्कर्मणा रूपायितेति श्रोतु: अवगन्तुश्च त्वरितं दीर्घस्थायी बोध: समुत्पद्यते। न कोऽपि श्रोता कार्यद्रष्टा वा कार्यस्य प्रयोक्तु: वक्तु: वा मानसिकं भावं तत्तत्कार्यपिक्षया तत्तद्वचोदृष्ट्या इतरं न मनुते। अत: पूर्वं प्रसिद्धिरस्ति, 'शतं वद, मा लिख'। अर्थात् लेखनेन अर्थात् कार्येण कार्यकर्तु: स्तर: स्वत एव सिद्ध्यति। एतस्य नायमाशयो यत् अस्माभि: कार्यं न करणीयं वचो न प्रयोक्तव्यमिति वा। अपितु व्यवहारकाले अस्माभि: सावधानैर्भवितव्यमिति अत्र तात्पर्यम्। अत: महाभाष्यकार: शब्दानुशासनस्य प्रयोजनविवक्षाकाले-

**यस्तु प्रयुङ्क्ते कुशलो विशेषे**
**शब्दान् यथावद् व्यवहारकाले।**
**सोऽनन्तमाप्नोति जयम्**

इत्युक्त्वा व्यवहारकाले प्रामाणिकप्रयोगाणामवश्यकरणीयता अभ्यर्हिता। किं चैतावता व्यवहारकालगतेन शुद्धेन संस्कारयुक्तेन निरन्तरेण प्रयोगविधिना क्रमश: मानसान्वये जाते क्रमश: मनोगता भावनापि शुद्धतामधिगमिष्यति। ततस्तु कायमनोवचोभि: एकवाक्यताया: सिद्धे: स्वयमेव प्रामाणिकता स्थायिरूपतां प्राप्स्यति।

एवमेव शास्त्रीयां प्रामाणिकतां पोषयितुकाम: अष्टादशदशतकस्योत्तरार्द्धे पुदुच्चेर्यां विद्यमान: विद्वान् 'मारीदास: पुल्ले' आरण्यकस्यास्मिन्नङ्के सपरिचयं प्रस्तूयते। स्वातन्त्र्योत्तरकालेऽस्मिन् संस्कृतकथासाहित्यसमृद्धये क्रियमाणप्रयत्नानाम् उत्कलीयानां कृतिपरिचयेन, वेदाङ्गानां वैशिष्ट्यपोषितपरिचयेन च पुष्टिं गच्छत्यस्मिन्नङ्के 'कनीयान् राजकुमार:' इति फ्रांसीयोपन्यासस्य 'ल पति प्रांस' (Le Petit Prince) इत्यस्य संस्कृतानुवादग्रन्थ: समीक्ष्यते। विलम्बेन प्राकाश्यमागतस्यास्याङ्कस्य प्रामाण्यं प्रमाप्रियाणां विदुषां समीक्षया सिद्धिमवाप्स्यतीत्याशास्यते।

विद्वद्वशंवद:
गोपबन्धु मिश्र
सम्पादक:, आरण्यकस्य



## सूचीपत्रम्


| विषय: | लेखक: | पृष्ठम् |
|---|---|---|
| १. मारीदास: पुल्ले १७२१-१७९६ | महामहोपाध्याय: प्योर् सिल्वें फिल्योज:<br>Professer of Sanskrit emeritus,<br>Member of 'Institut de France'<br>13, Rue Rambuteau<br>Paris | १ |
| २. स्वातन्त्र्योत्तरकालिक-संस्कृत-कथासाहित्ये उत्कलस्यावदानम् | प्रो. बनमाली बिश्वाल:<br>राष्ट्रियसंस्कृतसंस्थानम्<br>गङ्गानाथ-झा-परिसर:,<br>चन्द्रशेखर आजाद पार्क,<br>इलाहाबाद | ९ |
| ३. वेदाङ्गानामनुशीलनम् | गणेश त्रिपाठी<br>शोधच्छात्र:, संस्कृतविद्याधर्मविज्ञानसंकाय:<br>कलासङ्काय:, काशी हिन्दू विश्वविद्यालय:,<br>वाराणसी | ४७ |
| ४. कनीयान् राजकुमार: | ग्रन्थलेखक:-प्रो. गोपबन्धु मिश्र:<br>समीक्षक:-डॉ. सुनीलकुमारप्रधान:<br>ज्ञाननिकेतनम्,<br>पटना | ५३ |

# मारीदासः पुल्ले 1721-1796

## महामहोपाध्यायः प्योर् सिल्वें फिल्योजः

मारीदास इति नाम द्राविडभाषायां द्व्यर्थं भवति। पुदुच्चेरीपुर्यां ख्रीष्टीयकुलेषु फ्रांसीयभाषोच्चारणानुसारेण येशुमातुः मारी (Marie) दास इति मारीदास इत्यर्थः। अन्यथा हिन्दुकुलेषु मारीदेव्या दास इति मारीदास इत्यर्थः। द्राविडेषु मारीदेवी मारीरोगरक्षार्थं सर्वजनैः पूज्यते। पुल्ले इति अथवा पिल्ले इति एकस्या जातेर्नाम। अष्टादशशतके पुदुच्चेर्यां सा जातिः सात्कृता प्रभाववती चासीत्। 1721तमे वत्सरे मारीदासः पुल्ले लब्धजन्मा। तस्य पिता अप्पावु पुल्ले। कनीयान् भ्राता मुतिय पुल्ले। स ज्ञानमुतमल्ले इति नाम्न्याः पाणिमग्रहीत्। मनोहरत्तिमल्लेअम्मल्ले इति नाम्न्येका दुहिता तस्यासीत्, किंतु न पुत्रः। अत एव अतिरूपराय पुल्ले इति शुभनामधरः प्रथमवयस्को बन्धुर्भ्रातृव्यश्च मारीदास अप्पवु इति नामधरस्तेन स्वपुत्रीकृतौ। पञ्चाशद्वर्षेभ्यः प्राक् केचित् तद्वंश्या अवसन् पुदुच्चेर्यां तस्यामेव वीथ्यां यस्यां मारीदासस्य गृहमासीत्। पुराणं वीथीनाम तमाख्वापणवीथ्यासीत्। पश्चादानन्दरङ्गपुल्लेवीथीति नामान्तरं प्रायः प्रयुज्यते स्म। आनन्दरङ्गपुल्ले इति नामधरो महोदयः पुदुच्चेरिराज्ये दुप्लेक्स (Dupleix) नाम्नः फ्रांसीयशासकस्य द्विभाषामन्त्रिणो महत्तमपदमभजत्। तस्मिन् काले तत् फ्रांसीयराज्यं विस्तृततमं समृद्धतमं चाभवत्। तस्मिन्ननुकूलसमये मारीदासः द्राविडेषु जातत्वेन द्रविडीभाषाया आधारशिक्षणं लब्ध्वा तथा ख्रीष्टीयमतप्रचारकेभ्यः सकाशात् फ्रांसीयलतिनभाषयोः शिक्षामग्रहीत्। स कुशाग्रबुद्धिः भारतीयपाश्चात्त्ययोः संस्कृत्योः व्युत्पन्नः। ख्रीष्टीयप्रचारकैः निरन्तरसंपर्कं भजन्नपि एष न ख्रीष्टीयमतमग्रहीत्। तस्य नाम हिन्दुधर्मसंबद्धं भवितुं शक्यते। तस्य वंश्यैः हिन्दुनामानि ध्रियन्ते स्म। स वैष्णवसिद्धान्ते संलग्न आसीदिति भाति।

स चावडिनाम्नि न्यायालये फ्रांसीयद्राविडीभाषयोः द्विभाषावादिनः पदे नियुक्तः। पुदुच्चेरिपुर्यां द्वौ न्यायालयौ स्तः। एकः फ्रांसीयधर्मशास्त्रानुसारी प्रधानो न्यायालयः। अपरो जात्यादिविषयेषु व्यवहाराणां निर्णयार्थं भारतीयधर्मशास्त्रानुसारी न्यायालयः। द्राविडीभाषायां तस्य नाम चावडिन्यायालय इति। चावडिशब्दस्य धर्मशालेत्यर्थः। पुदुच्चेरीस्थलेखरक्षागारम् (Archives) चावडिन्यायालयस्य अष्टादशशतकीयपत्राणि रक्षति। तेषां मध्ये कानिचित्पत्राणि मारीदासस्य हस्ताक्षरं धरन्ति। पूर्वतमं पत्रं 1767तमे वत्सरे अर्वाचीनतमं 1794तमे वत्सरे लिख्यते स्म। मारीदासः 1796तमे वर्षे दिवं जगाम। अत एव स 1767तमाद्वत्सरात् पूर्वं न्यायालये नियुक्तः सन् आ चरमदिनात् स्वाधिकारं निरवहदित्यूह्यते। पारितोषिकत्वेन चत्वारि क्षेत्रभूमिदानानि तस्मै वितीर्णानि। तस्य लोकयात्राविषये न किंचिदधिकं ज्ञायते।

परंतु स तत्काले मानसिकेतिहासे स्मरणीयं कर्म विहितवानित्यवगम्यते। तस्य सुकृतानां मध्ये वैज्ञानिकविज्ञापनानां यस्मै कस्मैचित्प्रार्थयते वितरणं विराजते। यदा कश्चित् फ्रांसीयः सैनिकाध्यक्षः शासनाधिकारी वा श्रेष्ठी वा यः कश्चिदन्यो वा भारतीयप्राकृतिकपर्यावरणविज्ञानकलादिविषये जिज्ञासया तमुपागच्छत् तदा स पुण्यनिधिः स्वज्ञानमौदार्येण दत्तवान्। अपि च तेन कतिपयाः साहित्यिकवैज्ञानिकग्रन्था विरचिताः। ते न कदापि मुद्रितरूपेण प्रकाशिताः। नियतप्रचारैः हस्तलिखितैः कोशैरेव ज्ञायन्ते। तथापि ते मुद्रणं विस्तृतप्रसृतिं चार्हन्ति स्म। परंतु दैवादष्टादशशतके प्रचलितान् साहित्यिकस्वत्वस्यानुचिताभिप्रायाच्च तैः प्रसिद्धिर्न कदापि लभ्यते स्म। एक एव मुद्रितरूपेण प्रकाशितोऽभूत्। परंतु तत्र तस्य नाम कर्तृत्वेन नोपादीयते स्म।

कतिपयाः समकालिनः फ्रांसीया विद्वांसस्तस्य पाण्डित्यं च ग्रन्थान् च प्रस्तुतवन्तः। तेषा मध्ये अंक्तिल् दुपेरों (Anquetil Duperron 1731-1805) अवेस्तवेदग्रन्थान् प्रेप्सुः अवेस्तभाषायाः संस्कृतभाषायाश्च प्रतिपत्तये वर्षसप्तकं यावत् भारतदेशे शौर्येण पर्यटित्तवान्। भारतदेशप्राप्तिसमये उपाध्यायमन्विष्यन् मारीदासेन सह 1755तमे वत्सरे स्वमेलनमासीदिति तेन विज्ञापितम्। तदनन्तरं स तेलुगुसंस्कृतफ्रांसीयशब्दकोशस्य प्रतिकृतिं प्रेप्सुः मारीदासेनैव तत्कार्यं सम्यक्करिष्यत इति कर्दु (Coeurdoux) नामानं महाशयमुद्दिश्य पत्रे लिखितवान्।

फ्रांसीयज्योतिषिप्रकाण्डो ल जंति नामा (Le Gentil 1725-1792) सूर्यमण्डले



शुक्रस्य संक्रमणस्य प्रेक्षणं चिकीर्षुः पुदुच्चेरीं प्रति गतवान्। सूर्यस्य मेघाछत्रत्वात् तत्प्रेक्षितुं नाशक्नोत्। किन्तु स पुदुच्चेर्यां दश वत्सरान् यावन् न्युष्य मारीदासस्योपकारेण बहूनि वैज्ञानिकतत्त्वानि प्रेक्षितवान् संगृहीतवान् च। स 1779तमे वर्षे प्रकाशिते स्वपर्यटनचारित्रे मारीदासस्य वैदुष्यं धीगाम्भीर्यं च प्राशंसत्।

ऐतिहासिको द गिञ्नामा (De Guignes 1720-1800) मारीदासस्य भागवतानुवादग्रन्थं पठित्वा तद्व्याख्यानं कुर्वन् तस्य नाम प्रत्यभ्यज्ञासीत्। अन्ये तु समकालिनः तस्योपकारं प्रतिगृह्य तस्य ग्रन्थान् स्वीकृत्य न कदापि नामोक्तिं चक्रुः। मारीदासः तादृशीं कृतघ्नतां खेदेन न्यवेदयत्। तस्य साहित्यिकसेवायाः प्रत्यभिज्ञानं साहित्येतिहासविषयेऽधुनिकैर्विमर्शकैरेव दत्तम्।

पाश्चात्त्यविज्ञानेन भारतीयविज्ञानस्य संबन्धं साधयित्वा मारीदासो भारतदेशविषये विमर्शस्योतिहासे प्रथमपदं भजते। वैष्णवदेवचारित्रादौ भारतीयराजवंशचारित्रे च ज्योतिषशास्त्रे च भारतदेशपुराविज्ञानस्य विषयत्रयं प्रति स्वमंशमदात्। द्वौ श्रेष्ठौ ग्रन्थौ तेन विरचितौ। प्रथमतः द्राविडभागवतपुराणस्य फ्रांसीयानुवादः, ततो भारतीयज्योतिष-शास्त्रसंग्रहः।

मारीदासो वैष्णवधर्मविषये सम्यग्व्युत्पन्नः। दक्षिणभारतदेशस्य वैष्णवानां भागवतपुराणं पञ्चमवेद इव प्रामाण्यं भजते। मूलसंस्कृतभागवतपुराणं प्रायशो द्राविडदेशे विरचितम्। तथा हि विष्णुभक्तिपूर्णा आल्वार् कवयो द्राविडवेदकर्तारस्त-त्रोपादीयन्ते। किं च द्राविडदेशे राधा न ज्ञाता, नापि भागवतपुराणे प्रस्तुता। द्राविडभाषायां संस्कृतभागवतपुराणस्य त्रयोऽनुवादाः प्रसिद्धिं भजन्ते। पञ्चदशशतकान्ते चेव्वैच्चूटुवर् कविः 4970 द्राविडश्लोकमयं 'विण्टुपाकवतं' विरचितवान्। किं च अरुलाताचर् कविः 9167 श्लोकमयं 'वाचुतेवकतया' भिधं दीर्घग्रन्थं कृतवान्। अष्टादशशतके आर्यप्पपुलवर्नाम्ना वेल्लालजातिकविना 4970 वृत्तश्लोकमय-'स्तरुक्कुतन्तै' ग्रन्थो रचितः। फ्रांसीयपाठान्तरं तेभ्यो ग्रन्थेभ्यो लघ्वीभूतं मारीदासेन स्वयमेव संक्षिप्तरूपेण कृतम्। अथवा अन्यस्य द्राविडसंक्षिप्तस्य पाठान्तरस्य फ्रांसीयानुवादस्तेन ग्रथितः।

मारीदासेन फ्रांसीयभागवतम् आ चरमदिनात् पुनः पुनः संशोधितम्। तत्कतिपयेभ्यो भेदवद्भ्यः पाठान्तरेभ्यः निर्णीयते। प्रथमं हस्तलिखितं पुस्तकं 1769तमाद् वर्षात्

पूर्वं रचितवान्। तथा हि तस्मिन्नेव वत्सरे स हंरि बर्त्तें-नामानं (Henri Bertin) मन्त्रिणं प्रति तत्पुस्तकं प्रषितवान्। बर्तें-महाशय आदरणीयो मन्त्री बहूनां कार्याणां मध्ये भारतदेशे फ्रांसीयवाणिज्यसंस्थायाः (Compagnie des Indes) अध्यक्षताधिकार आसीत्। अपि च वैज्ञानिकानां साहित्यकाराणामैतिहासिकानां च रक्षणशीलः अभवत्। एष शासनसाहित्यविद्याप्रतिष्ठानस्य (Acad mie des Inscription et Belles-lettres) विज्ञानप्रतिष्ठानस्य (Acad mie des Sciences) च सदस्यः सन् प्राच्यविद्यायां सुनिष्ठिताभ्याम् अंक्तिल् दुपेरों (Anquetil Duperron)- द गिञ् (De Guignes) नामभ्यां सहसदस्याभ्यां तत्पुस्तकं प्रादात्। अंक्तिल्दुपेरों अवेस्तग्रन्थस्यानुवादरचने व्यापृतः सन् दिवसत्रयं यावत् तत्फ्रांसीयभागवतं समीक्ष्य द गिञ्महोदयाय मारीदासस्य ग्रन्थमुत्तीर्णवान्। द गिञ्-इतिहासाचार्यः तद्ग्रन्थमालोच्य नवमार्गप्रवर्तकं युक्तार्थं विमर्शमकरोत्। 1772तमे संवत्सरे शासनसाहित्यविद्याप्रतिष्ठाने भारतीयराजवंशकालनिर्णयाभिप्रायेण भागवतपुराणे उपात्तानां तत्त्वानां व्याख्यानमकरोत्। तत् "अष्टादशपुराणेषु एकस्मिन् 'बगवदम्' इत्याख्ये भारतीयग्रन्थे विमर्शाः" इत्याख्यायते। एतस्मिन् प्रकरणे द्वे काण्डे उद्धरणमर्हतः। संस्कृतभागवतस्य संस्कृतनामानि द्राविडभाषायां भिन्नाक्षराणि भवन्ति। द्राविडभागवतस्य फ्रांसीयानुवादे तानि पुनः फ्रांसीयोच्चारणानुसारेण विशिष्यन्ते। अत्रोद्धरणे तेषामन्तिमं रूपं रक्षितम्। प्रथमतः–

**"श्रीमान् बर्तें महोदयो मन्त्री 1769तमे वर्षे एकस्य भारतीयस्य पुस्तकस्यानुवादं गृहीतवान्। इदं 'बगवदमि'त्याख्यमष्टादशपुराणेषु पुण्यकथाभूतेष्वेकमस्ति। 'बगवदम्' देवताकथेति यावत्। मारीदासः पिल्लै भारते जातः, पुदुच्चोरीपरिषदि द्विभाषाभिवादी फ्रांसीयभाषानुवादमकरोत्। बर्तें-महाशयाय स्वरक्षयितृत्वेन स्वराष्ट्ररक्षयितृत्वेन च तत्समर्पितवान्। अयं 'बगवदम्'ग्रन्थः पुण्येषु प्रामाणिकेषु पुराणेषु अस्तीति भाषान्तरकर्त्रा प्रस्तावनायामुक्तम्। तद् ब्रह्मपुत्रेण वेदसंशोधकेन 'व्यास्सन्' (व्यास) नाम्ना विरचितम्। श्रीवैष्णवेषु अविवादितं प्रामाण्यं तस्यास्ति। तथा ह्येतेषां वैष्णवाणां विष्णुरेव परमपुरुषो भवति। अयमनुवादो द्राविडानुवादान्तरमाश्रित्य विरचितः। मूलग्रन्थस्य भाषा भारतीयानां पुण्यभाषाभूतं संस्कृतम्।"**



द गिञ्-ऐतिहासिकाचार्यः प्रस्तावनायाः पश्चादवदत् यत् कालनिर्णयः स्वमुख्याभिप्राय आसीत्। विशेषतो भागवतपुराणान्तर्गतकालक्रमस्य समालोचयितुमैच्छत्। प्रथमत एष मारीदासस्य ग्रन्थे अपठदिदम्–

**व्यासो भागवतपुराणं विरच्य शुकनाम्ने स्वपुत्राय तदुपादिशत्, शुकश्च परीक्षिते धर्मराजस्य पौत्राय। प्रख्यातः प्रतापवान् धर्मराजः द्वापरयुगान्ते जगत् शासितवान्।**

तदा दगिञ्मनसि कश्चित्संदेह उदभूत्। खीष्टशतके 1768तमं वर्षं कलियुगे 4886तमो वत्सरो भवतीति तेन श्रुतम्। अत एव कलियुगारम्भः खीष्टशतकात्पूर्वम् 3116तमे वत्सरेऽभूदिति तेन ज्ञातम्। व्यासरचिताश्च ग्रन्थाः तत्कालादपि पुरातना आसन्। तत्र लिखितवान्–

**यदि स कालः स्वीक्रियते, तर्हि तानि पुस्तकानि सकलजगति पुराणतमानि स्युः। अपि तादृशेष्वैतिह्येषु विश्वासः पुनःपरीक्षां विना वितरणीयः? पूर्वं ते ग्रन्था अस्मन्नयनयोः पुरतो न कदाप्यागताः। यैर्दृष्टाः, ते न सावधानेन समीचीनसमीक्षामकुर्वन्। परंतु भागवतपुराणं तादृशपुराणतायाः परिहारार्थं हेतून् स्वयमेव प्रकल्पयति।**

तथा हि दगिञ्विदुषा मारीदासस्य 'बगवदम्'ग्रन्थे कतिपयानि वचनान्याश्रित्य विज्ञातैर्वैदेशीयैरैतिहासिकतत्त्वैः भारतीयानामैतिहासिकतत्त्वानां समकालीनता ऊहिता। पञ्चमस्कन्धे जगन्निरूपणावसरे श्वेतशृङ्गवत् पर्वतयोरन्तरे रम्यकहिरण्मयकुरुवर्षाख्यानि त्रीणि राज्यानि वर्तन्ते (5.16.8) इत्युक्तम्। हिरण्मय ईरान् देशोऽस्ति, रम्यको रोमपुरीसंराज्यमस्तीति द गिञ्महाशयेनोहितम्। अत एव भागवतपुराणरचनस्य कालः रोमकैः (Romans) इतलि (Italy) देशाक्रमणात् पश्चात् अशियद्वीपे (Asia) संक्रमणस्य कालो भवति। तत्खण्ड्यमूहमात्रमिति द गिञ्विदुषा स्वयमेव संमतम्। अतः पुराणादेवोद्धृतं प्रमाणान्तरं प्रादर्शयत्।

**ततः राजानः स्वोच्चपदात्पतिताः शूद्रजातौ भविष्यन्ति, ब्राह्मणजातीयश्च चन्द्रगुप्तो देशस्य प्रभुर्भविष्यति।**

**11. ततः तुरुष्काणामष्टौ गणौ भविष्यतः।** (12.1.30)

तुरुष्काः प्रसिद्धाः। तेषामितिहासः पारसीयतुरुष्कीयचारित्रेभ्यः सम्यग्विज्ञात आसीत्। तेषां भारतदेशे आक्रमणानां कालः सम्यग् वर्णितः। तुरुष्का मध्य-अशिय-देशेषु (Asia) 553तमवत्सरं परितः आविरभवन्। 'घज्नेविदु'-राजा महमुदु-नामा 975तमे वर्षे भारतमाक्रान्तवान्।

मारीदासस्य 'बगवदम्'ग्रन्थेन्यद्वचनमधिकृत्य पुराकालीन-ग्रीक्-ऐतिहासिकलेखनैः तुलनाविमर्शः प्रारब्धः। द्राविडभाषायां चन्द्रगुप्तशब्दस्य 'चन्त्रकुत्तन्' इति रूपान्तरं धरति, मारीदासस्य ग्रन्थे (Sandragouten) इति लिख्यते। द्योदोरोस्-स्त्रबो-अर्रिअनोस् इत्यादिभिः 'सन्द्रकोत्तोस्' भारतीयराजत्वेनोपात्तः। ख्रीष्टशतकात्पूर्वम् 303तमे वत्सरे सेलुकोस् -निकतोर्-नामा (Seleucos Nikator) अलेक्सन्देर् सम्राजोऽनुकर्ता भारतदेशाक्रमणमभिप्रेत्य चन्द्रगुप्तस्य बलवतीं सेनाम् असंख्यान् च गजान् दृष्ट्वा स्वाभिप्रायं त्यक्तवान्। एवं चन्द्रगुप्तस्य कालो निर्णेतुं शक्यते। एषा समकालता भारतेतिहासस्य कालक्रमं विश्वेतिहासेन युनक्ति। एषा न केनापि कदापि खण्डिता। द गिव्विदुषः शैली विविधहेतुभ्यो युक्तियुक्तकालक्रमस्य निर्णये स्मरणीया मार्गदर्शिनी च। तदपि मनसि धारणीयं यद् दगिव्विदुषोऽयं समकालतानिर्णयो मारीदासस्य ग्रन्थे आश्रितः सन् द्वयोर्विदुषोः सहकार्यस्य फलमस्ति। एकप्रयोजनानां समविद्यासेवातत्पराणां च विदुषां सहप्रवृत्तिः वैज्ञानिकविमर्शप्रगते रहस्यम्।

अत्रापि मारीदासस्य 'बगवद'ग्रन्थे कोऽपि विशेषो विद्यते। तत्र "Sandragouten de la race des Brahmaner" चन्द्रगुप्तो ब्राह्मणजातीययत्वेनोपात्तः। तन्त्रोक्तं भागवतपुराणे। तत्रैवमुक्तम्–

**नव नन्दान् द्विजः कश्चित् प्रपन्नानुद्धरिष्यति।**
**तेषामभावे जगतीं मौर्या भोक्ष्यन्ति वै कलौ।।**
**स एव चन्द्रगुप्तं वै द्विजो राज्येऽभिषेक्ष्यति।**

परंतु फ्रांसीयग्रन्थे चन्द्रगुप्तस्य ब्राह्मणजातीयत्वविशेषणं स्पष्टम्। स विशेषो मारीदासेन वा तस्य द्राविडमूलग्रन्थेन वा प्रकल्पितः।

एष चन्द्रगुप्त-सेलुकोस्-राजसमकालतानिर्णयः भारतीयेतिहासविज्ञाने मुख्यप्रसङ्गो भवति। 1772तमस्य वत्सरस्य वैशाखमासे परिस् पुर्यां राजकीयशासनसाहित्यविद्या-



प्रतिष्ठाने (Acad mie royale des inscriptions et belles-letters) श्रीमान् द गिञ् तं निर्णयं विज्ञापयामास। तस्मिन्काले फ्रांसीयविद्याप्रतिष्ठानस्य प्रसिद्धिः सकलयूरोपीयदेशेषु विस्तारं भजते स्म। 1799तमे वत्सरे कालीघट्टनगरे (Calcutta) अश्यतिक-सङ्घे (Asiatic Society) स्वसभापतिव्याख्याने विल्सन् (Wilson) द गिञ्मारीदास-विद्वांसावनधिकृत्य तमेव समकालतानिर्णयं व्यज्ञापयत्।

मारीदासस्य 'बगवदम्'ग्रन्थस्य द गिव्विदुषा पठितलिखितकोश इदानीं नोपलभ्यते। तत्कोशस्येतिहासो न ज्ञायते। अन्यो लिखितकोशोऽन्यस्य विदुषो हस्तयोरासीदिति ज्ञातम्। तथाहि फुशेदोब्सोंविल् (Foucher d'Obsonville) नामा प्राणिशास्त्रविद्वान् पुदुच्चेर्यां न्युष्य भारतीयप्राणिजातस्य निरूपणमकरोत्। स मारीदाससकाशात् कोशमेकं गृहीत्वा फ्रांस्देशं प्रत्यागत्य तं संशोध्य प्राकाशयत् कर्तृनामोपादानमकुर्वन्। प्रस्तवानायां स गर्वेण गदति – **भागवतपुराणानुवादार्थं कस्मैचिद्भारतीयमानवाय वेतनमदामिति**। अष्टादशशतके यूरोपीयदेशेषु न साहित्यकाराणामधिकारा आसन्, न निजचित्सर्गस्य स्वत्वम् (Intellectual Property) आसीत्। वेतनदानात् नियोक्ता ग्रन्थस्य स्वामिनमात्मानं मन्यते स्म। किं चैष फुशेदोब्सेंबिल् मारीदासस्य अकृतज्ञतां पर्यवदत्, यस्मात् स बेर्ते-मन्त्रिणे कोशान्तरं ददौ। तादृशोऽनुभवो मारीदासस्य खेदहेतुः। तथापि अनुवादस्य संशोधनार्थं विस्तरणार्थं च स आ चरमदिनाद् देवभक्त्या स्वग्रन्थं श्रेयस्त्वं प्रापयति स्म। स चरमो लिखितकोशः पुदुच्चेरीनगरे रक्षितः सन् 1920तमे संवत्सरे होस्तेन्नाम्ना (Hosten) भारतीयेतिहासविदुषा सवैमर्शकप्रस्तावनः पुदुच्चेर्यां प्रकाशित आसीत्। तेन विमर्शेन मारीदासस्य विद्यासेवायां शैल्यां च चिराभिज्ञानं प्रदीयते स्म।

अपि च फ्रांस् देशस्य राष्ट्रियपुस्तकालये मारीदासविरचितस्यान्यास्यापि ग्रन्थस्य अनर्घलिखितकोशो रक्ष्यते। "**द्राविडेषु प्रचलितं ज्योतिषशास्त्र-व्याख्यानमि**"त्याख्यः। एष 1787तमे वत्सरे मारीदासेन श्रीमते मोनरों (Monneron 1735-1799) महोदयाय प्रेषितः। तथाहि मारीदासो ज्योतिषविद्वान् बभूव। ज्योतिषशास्त्रे करणप्रयोगं सम्यग्विमृश्य स्वायुषोऽन्ते ज्योतिषविद्याया बृहदाख्यानं पर्यवस्यति स्म। मोनरों-महोदयः श्रेष्ठी फ्रांसीयशासनाधिकारी च पुदुच्चेरीनगरे चिरेण न्युष 1786तमे वत्सरे फ्रांस्देशं प्रत्यगात्। अग्रिमवत्सरे मारीदासस्य

ज्योतिषकोशं प्रतिगृह्य राष्ट्रियपुस्तकालये तं विन्यक्षिपदिति भाति। तत्र एतद्ग्रन्थरत्नं प्रायेण विस्मृतम्। न केनाप्यधीतम्। इदानीमेव प्रकाशनं प्रारभ्यते। सप्तदशशतकान्तात्प्रभृति फ्रांसीये विज्ञानप्रतिष्ठाने प्राच्यज्योतिषं प्रति कौतूहलमासीत्। केचन खिष्टीयप्रचारकाः स्यम्-देशे (Thailand) भारतवर्षे च न्युष्य ज्योतिषां समीक्षणानि कृत्वा भारतीयज्योतिषशास्त्रे विविधविषयान् पर्यचिन्वन्। ततः बयि-नामा (Bailly 1736-1793) विज्ञानप्रतिष्ठानस्य (Acad mie des Sciences) सदस्यः ज्योतिषशास्त्रेतिहासे विमर्शं कृत्वा विशेषतः प्राच्यज्योतिषमधीतवान्। स प्रसिद्धस्य 'पुराकालीनज्योतिषेतिहासस्य' कर्ता। 1787तमे वर्षे स प्राच्यज्योतिषविषये इतिहासग्रन्थं प्राकाशयत्। मारीदासस्य ज्योतिषग्रन्थः तेन दृष्टो न वा इति न ज्ञायते। ततः फ्रांसीयमहाक्रान्तेः (French Revolution) आरम्भे स मुख्यनायक आसीत्। मितस्वभावः सन् 1793तम वर्षे आततायिभिर्हतः।

मारीदासस्य ज्योतिषग्रन्थः फ्रांसीयभाषायां संस्कृतज्योतिषसाहित्यं द्राविडेषु प्रचलित-प्रयोगद्वारेणाश्रित्य विरचितः। संस्कृतज्योतिषसंज्ञा ग्रन्थलिप्या द्राविडसंज्ञा द्राविडलिप्या लिखिताः। द्राविडेषु केरलेषु च प्रसिद्धस्यार्वाचीनज्योतिषसाहित्यस्य सर्वे विषयास्तस्मिन् ग्रन्थे सरलरीत्या व्याख्याताः। द्राविडपञ्चाङ्गस्यापूर्वविशेषा अन्तर्गताः। तथाहि दक्षिणभारतप्रयोगे ग्रहदेशान्तरनिर्णयार्थं वाक्यकरणं मुख्यत उपयुज्यते। वररुचिना रचितानि वाक्यानि अक्षररूपेणाङ्कलेखनरीत्या कटपयाद्याख्यया रेखांशसूचकानि लघूनि 248 संख्याकानि संस्कृतवचनानि विद्यन्ते। यथा – तृतीयं वाक्यम् ''रुद्रोऽस्तु नम्यः'' अथवा ''1.6.22''। मारीदासेन सावधानेन सविस्तरेण च रचितो ग्रन्थः प्रशंसामर्हति।

अद्य अभिज्ञानसमय आगतः। मारीदासो द्राविडपण्डिततत्वेन योरोपीयदेशेषु भारतीयसंस्कृतिप्रचारकत्वेन च स्मरणीयः। 18-19इत्यनयोः शतकयोः भारतवर्षे फ्रांसीयजनानां चरितानि च प्रभुत्वं च संतोषेण विस्मर्तव्यानि। किन्तु भारतीयपाण्डित्य-संप्रदायेन विद्यादिविषये तेषां संबन्धः प्रकर्षेण स्मरणमर्हति। अनेन नवीनसंस्कृतिभावना उभयोर्देशयोः विज्ञानप्रगतौ हितकारी उत्पद्यते।

❖



# स्वातन्त्र्योत्तरकालिक-संस्कृतकथासाहित्ये उत्कलस्यावदानम्

प्रो. बनमाली बिश्वालः

## भूमिका

भास-कालिदास-भवभूति-श्रीहर्ष-बाणभट्ट-दण्डिसदृशैः महाकविभिः सम्प्रवाहितायाः पद्य-गद्य-नाट्यसम्रहित्यधाराभिः त्रिधा विभक्तायाः संस्कृतसाहित्यत्रिपथगायाः प्रवाहः एकविंशशतकेऽपि तथैव प्रवहमानो दृश्यते। पद्यसाहित्यमहाकाव्य-लघुकाव्य-गीतिकाव्यादिभिः भेदैः विभक्तं तथा गद्यसाहित्यञ्च कथा-उपन्यास-लघुकथा-ललितनिबन्ध-यात्रावृत्तादिभेदैः विभक्तं शोभते। एवमेव नाट्यसाहित्यस्यापि नैके एकाङ्क-रेडिओरूपक-वीथीनाटकादयः सभेदोपभेदाः सन्दृश्यन्ते। उपर्युक्तेषु समेषु क्षेत्रेषु सर्जनरतानामाधुनिक-लेखकानां संघर्षमयी भूमिका सन्तोषयति पाठकान्। समग्रे भारतवषे स्वस्वस्थानेषु उपविश्य संस्कृतरचनाकाराः विविधप्रत्यग्ररचनामाध्यमेन किमपि ऐतिहासिकावदानं कुर्वन्तः सन्ति। उत्कलीयसंस्कृतरचनाकाराः न तत्रापवादभूताः। न केवलं काव्य-नाटक-उपन्यासादि-रचनासु किन्तु संस्कृत-कथा-प्रणयन-प्रसङ्गेपि उत्कलीय-संस्कृत-कथाकारणां भूमिका प्रशस्या। तत्र च पूर्वं काव्य-काव्यशास्त्र-प्रणयनपटुभिः श्रीहर्ष (1100-1200A.D.) -जयदेव (1147A.D.)-कृष्णानन्द-सान्धिविग्रहिक (1365A.D.) -विश्वनाथकविराज-(1400-1500A.D.)-प्रभृतिभिः सह प्राचीनकथासाहित्यस्याधारभूतस्य पञ्चतन्त्रसदृशस्य कथाग्रन्थस्य युगप्रवर्तकाः कर्तारः विष्णुशर्माणः अपि उत्कलीयाः एव आचार्याः आसन्निति इतिहासकारेषु केचिदभिप्रयन्ति। साहित्य-(वक्रवाकचक्रपाणिपट्टनायकस्य गुण्डिचाचम्पूः)-व्याकरण-(गोपीनाथनन्दशर्मणः बृहच्छब्दतत्त्वबोधाभिधानम्)- काव्यशास्त्र-(गजपतिनारायणदेवस्य अलङ्कारचन्द्रिका, म.म.नरहरिपण्डितस्य कविचिन्तामणिः)-कोष-(पुरुषोत्तमदेवस्य एकाक्षरी कोशः)-दर्शनज्योतिष-(वाइकोलिमहापात्रस्य जातकदर्पणम्, ज्योतिषरत्नावली)-धर्मशास्त्र

(निर्णयसिन्धुः)-दर्शनज्योतिष-(वाइकोलिमहापात्रस्य जातकदर्पणम्, ज्योतिषरत्नावली)-धर्मशास्त्र (-निर्णयसिन्धुः)- आयुर्वेद (गजपतिनारायणदेवस्य आयुर्वेदीयकौमुदी-) तन्त्र-सङ्गीतशास्त्र-(गजपतिनारायणदेवस्य सङ्गीतनारायणम्)- नाट्यशास्त्रेषु अपि उत्कलीयानां योगदानमविस्मरणीयम्। उत्कलीयः सामन्तचन्द्रशेखरः सिद्धान्तदर्पण-नामकं ज्योतिषशास्त्रीयं ग्रन्थरत्नं प्रणीय तत्रत्यनवीनसिद्धान्तानां कृते विश्वे प्रसिद्ध्यति।

वस्तुतः ऊनविंशशताब्दस्य अन्तिमदशके पण्डिताक्षमाराव-भट्ट मथुरानाथशास्त्रि-सदृशानां वरेण्यगद्यकाराणां लेखनीभ्यो जनिं लब्ध्वा संस्कृत-कथाविधा शीघ्रमेव आशातीतां प्रगतिं प्राप्य स्वातन्त्र्योत्तरकाले अभिराजराजेन्द्रमिश्र -राधावल्लभत्रिपाठी-देवर्षिकलानाथशास्त्री - नलिनीशुक्ला - केशवचन्द्रदाश-प्रभुनाथद्विवेदिप्रभृतिभिः कथाकारैः नित्यमौन्नत्यं प्राप्नुवती वर्तते। परवर्तिनि चरणे प्रशस्यमित्रशास्त्रि-इच्छाराम-द्विवेदि- बनमालीबिश्वाल- नारायणदाश- रवीन्द्रकुमारपण्डा-प्रमोदकुमारनायक- रामकिशोरमिश्र- कृष्णदत्तशर्म-प्रमोदभारतीयादिभिः कथाकारैश्च इयं विधा निरन्तरं यथार्थवादसंवलितं युगबोधमात्मसात्कुर्वती दृश्यते। फलतः कथाः (दीर्घकथाः), लघुकथाः (Short stories) टुप्-कथाः/पुटकथाः (Short short stories) स्पशकथाः (Detective stories), कान्तारकथाः (Jungle stories) हास्य-व्यङ्ग्यकथाः (Humorous stories) चेत्येते समे कथाभेदाः नवीनालङ्करणैः सह संस्कृतकथासाहित्यं समृद्धतरं कुर्वन्ति।

संस्कृत-कथासाहित्यस्य विकासयात्रां निरीक्ष्य ज्ञायते यत्तस्य प्रारम्भः पत्र-पत्रिकाणां माध्यमेनाजायत। ततः निरन्तरं कथासंग्रहाणां प्रकाशनमपि अभवत्। एष क्रमः कथासाहित्यस्य समृद्धेः लोकप्रियतायाश्च द्योतको वर्तते। भारतस्य स्वतन्त्रतायाः पूर्वमप्यनेकेषां कथासंग्रहाणां प्रकाशनमभवत्। स्वातन्त्र्योत्तरकाले च पण्डिताक्षमाराव-महोदयायाः कथामुक्तवली (1954) इति कथासंग्रहः गद्यविधया प्रकाशितः प्रथमः कथासंग्रहः स्वीक्रियते। यद्यपि तस्याः लेखिकायाः एकः अन्यः कथासंग्रहः 'कथापञ्चकम्' इति नाम्ना मुम्बइतः 1933तमे वर्षे प्रकाशितः आसीत्, किन्तु तस्मिन् संग्रहे अनुष्टप्-छन्दसा विरचिताः पद्यमय्यः एव पञ्च कथाः संगृहीताः सन्ति। तत्रत्या 'बालिकोद्वाहसङ्कटम्' इति कथा कथामुक्तावल्यां गद्यरूपेण 'विधवोद्वाहसङ्कटम्' इति नाम्ना पुनः प्रकाशिता। ततः भट्टमथुरानाथशास्त्रि- कलानाथशास्त्रि-राजेन्द्रमिश्र-



राधावल्लभत्रिपाठि-प्रभुनाथद्विवेदि-प्रशस्यमित्रशास्त्रि-इच्छारामद्विवेदिप्रभृतिभिः कथाकारैः भारतीयं संस्कृतकथासाहित्यमग्रेसारितम्। तस्मिन् क्रमे उत्कलीयकथाकाराणामपि महदवदानं वर्तते।

भारते विंश-शताब्दापेक्षया एकविंशशताब्दे संस्कृतेन कथाः अधिकाः एव लिख्यन्ते। मौलिक्यः कथाः भवन्तु उत पुनः अनूदिताः कथाः, अन्यप्रान्तस्य तुलनायाम् ओडिशाप्रदेशे संस्कृतकथाकाराणां तथा च तेषां गद्यरचनानां संख्या किञ्चिद् अधिका एव वर्तते। ममैतत् मतं केवलं कल्पनाश्रितं नास्ति किन्तु सर्वथा तथ्यसमर्थितमपि वर्तते। विशुद्धसंस्कृतसाहित्यसमीक्षापत्रिकायाः 'दृशः' तथा विशुद्ध-संस्कृतकथापत्रिकायाः 'कथासरितः' सम्पादनावसरे अहमेतेन तथ्येनावगतोऽभवम्। एतत् तु भिन्नमेव तथ्यं वर्तते यदेषु कथाकारेषु अधिसंख्याकाः उत्कलीय-संस्कृत-कथाकाराः ओडिशाप्रान्ताद् बहिरेव निवसन्ति। यथा - रवीन्द्रकुमारपण्डा, नारायणदाशः, अरुणरञ्जनमिश्रः, राधिकारञ्जनदाशः, सम्पदानन्दमिश्रः, भागीरथी नन्दः, गोपबन्धु मिश्रः, सदानन्द दासः, पूर्णचन्द्र उपाध्यायः तथा बनमाली विश्वालश्च।

एवमुत्कले उत्कलाद् बहिश्च निवसताम् उत्कलीय-संस्कृतकथाकाराणां सूची अपि दीर्घा एवास्ति। एते च उत्कलीय-संस्कृत-कथाकाराः समकालिक-संस्कृतसाहित्ये-तिहासे उत्कलस्य नाम योग्यमङ्कयन्ति। एकतः उत्कलीय-संस्कृतकथाकारेषु वरिष्ठाः सन्ति प्रो. केशवचन्द्रदाशाः तथा कनिष्ठा च वर्तते पराम्बा श्रीयोगमाया। यद्यपि केशवचन्द्रदाशात्पूर्वमपि उत्कले नैके अन्ये अपि कथाकाराः अभवन् तथापि केशव-चन्द्र दाशाः न केवलमुत्कले किन्तु समग्रे भारतवर्षे संस्कृत-कथासाहित्यं काञ्चन नवामेव दिशं प्रादर्शयत्। एतेषां गद्यलेखनप्रवृत्तिः कथायां सीमिता नास्ति। यतो हि एते भारतस्य प्रतिष्ठिताः उपन्यासकाराः अपि सन्ति। एतेषां षोडश उपन्यासाः प्रकाशिताः सन्ति। एवमेव उत्कलीय-हास्य-व्यङ्ग्य-रचनाकारेषु डॉ. प्रमोद कुमार नायकः उल्लेख्यो वर्तते। न केवलमुत्कले किन्तु सम्पूर्णे भारतवर्षे व्यङ्ग्य-रचनाकाररूपेण डॉ. नायकस्य प्रसिद्धिः वर्तते। हास्यमञ्जरीकारः सम्पदानन्दमिश्रः अपि हास्य-व्यङ्ग्यकथाः लिखितवान्। एवमेव स्पशकथाकाररूपेण सम्पूर्णे भारतवर्षे उत्कलीयः कथाकारः डॉ. नारायणदाशः प्रसिद्धः।

आधुनिक-संस्कृत-कथा-साहित्यस्य वस्तुगतं, शैलीगतं विधागतञ्च बहुविधं वैशिष्ट्यं वर्तते इत्यत्र नास्ति शङ्कावसरः। आलेखेऽस्मिन् उत्कलीय-संस्कृत-कथाकाराणां संस्कृत-कथा-साहित्ये वस्तुगतं, शैलीगतं विधागतं च यद् वैशिष्ट्यं वर्तते तत् सर्वं सविशदं विवेचयिष्यते। एतेन मे शोधालेखेन संस्कृत-कथा-प्रणयन-प्रसङ्गे उत्कलीयसंस्कृतकथाकाराणां कीदृशी भूमिका वर्तते इति स्पष्टीभविष्यति। यथा राजस्थानस्य संस्कृत-कथाकाराणां योगदानमधिकृतं स्वतन्त्रं शोधकार्यं सञ्जातं, पुस्तकमपि प्रकाशितं तथा च भारतस्य अन्यप्रान्तीयसंस्कृतकथाकाराणामवदानमधिकृत्य समग्रतया कार्यं न जातम्। उत्कलीयविदुषाम् आधुनिकसंस्कृतसाहित्ये योगदानम् इति विषयमवलम्ब्य राष्ट्रिय-संस्कृत-संस्थानस्य पुरीस्थे सदाशिवपरिसरे गते वर्षे एका त्रिदिवसीया संगोष्ठी समायोजिता आसीत्। एतस्यां संगोष्ठ्यां प्रस्तुतानां शोधपत्राणां संकलनम् उत्कलप्रतिभा इति शीर्षकेण अस्मिन्नेव वर्षे (2013) प्रकाशितम्। किन्तु तत्र समग्रे संस्कृतवाङ्मये (काव्येषु शास्त्रेषु च) उत्कलीयविदुषामवदानं विमृष्टम्। एवमेव आधुनिकसंस्कृतसाहित्यस्य विविधप्राचीनार्वाचीनविधासु उत्कलीय-साहित्यकाराणां योगदानमधिकृत्य यानि औपचारिकाणि अनौपचारिकाणि च शोधकार्याणि जातानि तेषां किमपि संक्षिप्तं विवरणमत्र प्रस्तूयते-गोविन्दनन्देन 'कॉण्ट्रीब्यूशन ऑफ ओरिसन ऑथर्स टू चम्पू लिटरेचर' इति विषयमधिकृत्य उत्कलविश्वविद्यालयस्य पी-एच.डी. इत्युपाधये 1997 तमे वर्षे शोधप्रबन्धः प्रस्तुतः, रघुनाथ पण्डामहोदयेन 'कॉण्ट्रीब्यूशन ऑफ ओरिसा टू संस्कृत लिरिक्स' इति विषयमधिकृत्य उत्कलविश्वविद्यालयस्य पी-एच.डी. इत्युपाधये 1993 तमे वर्षे स्वकीयः शोधप्रबन्धः प्रस्तुतः, 'कॉण्ट्रीब्यूशन ऑफ ओरिसा टू संस्कृत पोएटिक्स' इति विषयमधिकृत्य उत्कलविश्वविद्यालयस्य पी-एच.डी. इत्युपाधये 1983तमे वर्षे प्रफुल्लमिश्रेण स्वकीयः शोधप्रबन्धः प्रस्तुतः, 2006 तमे वर्षे डा. अरुणरञ्जनमिश्रेण Contemporary Sanskrit Writings in Orissa इति विषयमधिकृत्य पुस्तकं लिखितं तच्च प्रतिभा-प्रकाशनेन प्रकाशितम्, डॉ. बनमाली विश्वालेन Orissan Contribution to Sanskrit Grammar and linguistics इति विषयमधिकृत्य पुस्तकं लिखितं यत्र भूमिकायां उत्कलीयविदुषां साहित्यिकमवदानमपि विमृष्टम्, दृक्-नाम्न्यां षाण्मासिक्याम् आधुनिक-संस्कृत-साहित्यसमीक्षापत्रिकायां (1-27 अङ्केषु)



उत्कलीयसंस्कृतसाहित्यकाराणां योगदानं बहुधा समीक्षितम्, उशती-पत्रिकायाः सर्जनात्मके विशेषाङ्के तथा गद्य-विशेषाङ्के (5-6 अङ्कयोः) च केषाञ्चिदुत्कलीय-संस्कृत-रचनाकाराणां साहित्यं प्रकाशितम्, 'कथासरित्' इत्याख्यायां षाण्मासिक्यां संस्कृत-कथा-पत्रिकायां (1-17 अङ्केषु) विशिष्य अस्याः षोडशतरङ्गे बहूनामुत्कलीय-संस्कृत-कथाकाराणां कथाः प्रकाशिताः। एवमेव डॉ. जगन्नाथ पाठकेन सम्पादिते उत्तरप्रदेश-संस्कृत-संस्थानेन च प्रकाशिते 'संस्कृत वाङ्मय का इतिहास' इत्यस्य सप्तमे भागे (आधुनिकसाहित्यखण्डे) तथा राधावल्लभ त्रिपाठिनः 'बिसवीं शताब्दी का संस्कृत साहित्य' इत्यत्र भारतीय-रचनाकाराणां कृतित्व-विवेचनप्रसङ्गे केषाञ्चिदुत्कलीय-संस्कृत-रचनाकाराणां साहित्यिकमवदानं विमृष्टम्।

साम्प्रतमुत्कले संस्कृतकथाकाराणां संख्या भूयसी। अतः कथाप्रणयनप्रसङ्गे अन्यप्रान्तेभ्यः उत्कलस्य स्थितिः प्रवृत्तिश्च विशिष्यते। उत्कले प्रणीतानां संस्कृत-कथानां गुणात्मकः मानः अपि न न्यूनः। संस्कृतकथानां सर्वास्वपि विधासु उत्कलीयाः संस्कृत-कथाकाराः लेखनीश्चालयन्ति इत्यस्ति अपरं किमपि वैशिष्ट्यम्। तत्रास्ति महत्प्रमाणं बनमलिबिश्वाल-नारायणदाशयोः संयुक्त-सम्पादकत्वे प्रकाशितः कथासरित्-पत्रिकायाः विशेषाङ्कः 'उत्कलतरङ्गः', यत्र त्रिंशदधिकानां उत्कलीय-कथाकाराणां बहुविधाः कथाः प्राकाश्यं नीताः। अतः एतस्यां दिशि मया उत्कलादारभ्य कश्चन उपक्रमः क्रियते। एवमेव अन्यप्रान्तीय-संस्कृत-कथाः अधिकृत्य स्वतन्त्ररूपेण लेखाः लेखिष्यन्ते।

उत्कलस्य कथाकारेषु नारायणरथस्य (1931) नाम सर्वप्रथमं ग्रहीतुं शक्यते। किन्तु केशवचन्द्रदाशेन न केवलमुत्कले किन्तु समग्रे भारतवर्षे आधुनिक-संस्कृत-लघुकथासाहित्याय न केवलं काचित् नवा गतिः किन्तु नैकाः नवीनाश्च दिशाः दर्शिताः। तस्य दिशा-विदिशा - 1988, ऊर्मिचूडा - 1995, शून्यनाभिः - 2000 निम्नपृथिवी - 2001 एकदा तथा महान् इति शीर्षकाङ्किताः कथासंग्रहाः प्रकाशिताः अभवन्। ततः विंशशताब्द्याः अन्तिमे दशके तथा एकविंशशताब्द्याः प्रथमे दशके च बनमालिबिश्वाल -(नीरवस्वनः -1998, बुभुक्षा - 2001, जिजीविषा - 2006) - रवीन्द्रकुमारपण्डा - (छिन्नच्छाया) - नारायणदाश -(गङ्गे च यमुने चैव, हत्याकारी कः) - प्रमोदकुमारनायक - ('उवाच कुण्डुकल्याणः -

1998, स्वर्गादपि गरीयसी' , कथासप्ततिः) - प्रभृतिभिः नवीनैः उत्कलीयकथाकारैः भारतीयमाधुनिकसंस्कृतकथासाहित्योद्यानं स्वकथाभिः कथासंग्रहैश्च सम्पोषितं संवर्धितं च। विगते वर्षे पराम्बाश्रीयोगमायायाः कथासंग्रहः सम्पर्कः अपि लोकलोचनमागतः। पत्र-पत्रिकासु अरुणरञ्जनमिश्रस्य, गोपबन्धुमिश्रस्य, सदानन्ददासस्य, सम्पदानन्दमिश्रस्य, कुमारचन्द्रमिश्रस्य तथा च दिवाकरषडङ्गिनश्च काश्चन कथाः अपि प्रकाशिताः दृश्यन्ते। अस्मिन् आलेखे मया आधुनिकसंस्कृतलघुकथाक्षेत्रे उत्कलस्य अवदानम् इति विषये चर्चा विधास्यते।

1. **केशवचन्द्रदाशः ( 1955, जाजपुर, ओडिशा )**–आधुनिक-कथालेखकाः संस्कृत-कथासु समसामयिक-परिस्थितीः निरूप्य ताभ्यः आधुनिक-शैल्यां रूपमपि ददति। वर्तमान-संस्कृत- कथायाः वैशिष्ट्यं सम्पूर्ण-देशकालयोः प्रतिच्छाया वर्तते। यत्रैकतः डॉ. राजेन्द्रमिश्रस्य कथासु भोजपुरीगीतानां भावभूमिः वर्तते तत्रैवापरतः डॉ. केशवचन्द्रदाशस्य कथासु ओडिशाराज्यस्य देशकालभाषा-लोकसंस्कृतीनां प्रभावः दरीदृश्यते। नवयुगीन-शोषणस्य संघर्षस्य च निरूपणं विविधपृष्ठभूमिषु कृतं वर्तते। 'दिशा-विदिशा' इत्यस्मिन् कथासंग्रहे संगृहीतासु पञ्चाशति लघुकथासु, परिवर्तनशीलसमये नूतनयुग-प्राचीनयुगयोः परस्परं संघर्षशीलेषु संस्कारेषु समागतेनान्तरालकारणेनोद्भूतानां विविधपरिस्थितीनां वर्णनं वर्तते। गृह-सीमायाः बहिरागतायाः संघर्षरतायाः नार्याः चित्रणं, पत्नीपत्योः वधूश्वश्वोश्च संघर्षस्य अङ्कनमेतासां कथानां मुख्यः स्वरः वर्तते। एतासु कथासु सामान्य-जनजीवनस्य मनस उद्वेलनमन्तर्द्वन्द्वश्च मुख्यतया निरूपितौ। गृहकार्यैः सह व्यवसायेऽस्य येन केन प्रकारेण सामञ्जस्यं कुर्वती कार्यसंलग्ना स्त्री, अन्य- पारिवारिकजनैः सह येन केन प्रकारेण संघर्षयुक्तपरिस्थितिषु सामञ्जस्यं कुर्वतीनां स्त्रीणां, तत्तत्वानां च सूक्ष्मनिरूपणमेतासु कथासु वर्तते। आसु स्त्रीचरित्राणि शिक्षकप्राध्यापकलिपिकादिवृत्तिषु कार्यं कुर्वतीनां स्त्रीणां चित्रणं मध्यम-वर्गीय-पारिवारिकदशामनोदशानां मध्ये सफलतापूर्वकं कृतम्। अत्र एकतः स्वपतिना सह सामाजिकार्थिकविषयेषु तर्कवितर्कं कुर्वत्याधुनिका स्वावलम्बनशीला नारी वर्तते, अपरतश्च नारीणामेतादृशं परिवर्तितम् अप्रत्याशितञ्च रूपं दृष्ट्वा भिन्न-भिन्न-प्रतिक्रियाः प्रदर्शयन्ति पुरुषपात्राणि सन्ति। यौतुक-जनितं मृत्युं **स्वविषयं कुर्वती कथा 'गुञ्जा'[1] काचन मार्मिक्येव कथा वर्तते। द्वयोः मित्रयोः मध्ये**



आर्थिकभिन्नताकारणेनोत्पन्नं विरोधं विभाजनं च यथार्थवर्णेषु अङ्कितं कुर्वती 'रजोमहोत्सवः'[2] इति कथा मर्मस्पर्शिनी वर्तते। अत्र रमानलिन्योश्च सख्योर्मध्ये एकस्याः विवाहः आभिजात्यकुले भवति। अस्मात् कारणाद् द्वयोः मध्ये विभाजनमभवत्। 'दूरस्थलोके'[3] इति कथा किञ्चित् मार्मिकपत्रं वर्तते यस्मिन् काचित् पत्नी स्वपतिं पत्रं लिखति-प्रत्यागच्छ, पुत्री स्मरणं करोति। पश्यतु सा कदापि न मनसि शान्तिमाप्तुं प्रभवति। पत्रमाध्यमेन तस्येयं प्रार्थना प्रभावशालिनी दृश्यते। झरी,[4] नदी,[5] स्त्रीप्रत्ययः,[6] उपवीथिः,[7] शीतलकङ्कणम्[8] चन्द्रशाला[9] चेत्यादिषु कथासु नैराश्यैकान्ततयोः मुख्यः स्वरः वर्तते। कथा 'भाटकीयम्'[10] एकस्य भाटकवासिनः गृहस्वामिना सह द्वन्द्वं चित्रयन्ती अस्ति। सिद्धिः[11] इत्यस्यां कथायां द्वयोः प्रतिवेशिनोः संघर्षः वर्तते। एकः सज्जनः स्वनिवासक्षेत्रे वर्तमानस्य कस्यचित् जीर्णशीर्णमन्दिरस्य पुनरुद्धारं कर्तुमिच्छति। एतदर्थं सः सर्वजनान् प्रार्थयत। परन्तु निराशैव तस्य हस्तयोरागता। अन्ततोगत्वा सः पश्यति यत् पूर्णरूपेण ध्वस्तस्य मन्दिरस्य इष्टकानि चोरयित्वा जनाः स्वगृहस्य सोपानानि निर्मान्ति। 'दिशा विदिशा'[12] इत्यस्यां कथायां नायिका विदिशा स्वपरिवारस्य दशसंख्याकानां सदस्यानामुदरपूर्त्तये स्वशरीरं लज्जां च प्रतिरात्रि विक्रयार्थं विवशा वर्तते।

अत्यन्तसंक्षिप्तास्वेतासु कथासु लेखकः प्रायेण कस्याञ्चिद् भावभूमौ क्षीणरेखाङ्कनं कृत्वा शिष्टस्य भावार्थस्य कृते पाठकस्य विवेकमाश्रयते। यत्र-तत्र कथाकारस्य सूक्ष्माशयं ज्ञातुं पाठकानां कृते अतिरिक्तश्रमस्यावश्यकता प्रतीयते। एतस्मात्कारणात् कथाप्रवाहे च बाधा उत्पद्यते। लघुक्रियारहितवाक्यैः सुसज्जितायां कथाकारस्य भाषायां ओडिआ–भाषागत–कथाशैल्याः प्रभावः परिलक्ष्यते। यथा– *शूकर–रक्षी कोदण्डः। परिभ्रमणी तस्य इच्छानुसारिणी। वसतिः सन्ध्यानुवर्तिनी। शूकरचारणं तस्य जीविका। बाल्यात् सः शूकर–सञ्चारकः। मालिकस्तु अन्यः।* (चन्द्रमण्डलम्, दिशा विदिशा) क्षेत्रीयप्रभावकारणादुद्भूता चेयं नवीनशैली कदाचित् पाणिनीयव्याकरणस्य सर्वथानुपालनं न करोति।

अद्यावधि लेखकस्य षट् कथासंग्रहाः प्रकाशिताः-दिशा विदिशा (1988), ऊर्मिचूडा (1995), शून्यनाभिः (2000) निम्नपृथिवी (2001) एकदा तथा महान् च। कविता–कथा–उपन्यास–बालसाहित्येषु स्वविशिष्टशैलीवशात् लेखकस्य

विशिष्टं स्थानं वर्तते। अस्य लेखकस्य समर्थशब्दसंयोजना, वाक्शैली च पाठकान् पूर्णकथा–पठनाय विवशीकुरुतः। उत्तरप्रदेश–संस्कृत–संस्थान–द्वारा बाणभट्टपुरस्कारेण सम्मानिते ऊर्मिचूडा इत्यस्मिन् कथासंग्रहे चत्वारिंशत् लघुकथानां सङ्कलनं वर्तते। संग्रहस्यान्तिमा बृहत्तमा च 'कालकण्ठः'[13] इति कथा दुर्नीतीनां स्वार्थपरकतायाश्च चूडान्तनिदर्शनं प्रतीयते। पर्याप्तम् उत्कोचं दत्त्वा कार्यं (व्यवसायं) प्राप्य अनैतिकरूपेण धनार्जनं स्वादर्शं मन्यमानस्य पात्रस्यात्र यथार्थचित्रणं वर्तते। अत्र स्वार्थपरतायाः सर्वासां सीम्नामतिक्रमणाय समर्थस्य पुत्रस्य वर्णनं वर्तते। यः अनावश्यकव्यय–निवारणार्थं मातुः अन्तिमसंस्कारे नैव गच्छति। अस्मिन् प्रसङ्गे वृद्धपितुः मनोदशायाः मार्मिकं चित्रणं चित्तं कम्पयितुं समर्थं दृश्यते।[14]

आसु कथासु कथारसः बलात् नैव योजितः अपितु सङ्केतैः व्यक्तः। इदं पाठकस्य प्रतीतिक्षमताश्रितं वर्तते यत् केन प्रकारेण सः तासां कथानामास्वादनं कुर्यात्। इमाः कथाः पाठकस्यान्तःकरणे कल्पनातर्कचिन्तनानां सञ्चारं कर्तुं समर्थाः।[15] एताः वस्तुजगतः नावतीर्णाः अपितु भावजगतः उद्भूताः सन्ति।[16] कथापात्रस्य जीवनस्य क्षणविशेषेषु केन्द्रिताः इमाः कथाः सम्पूर्णजीवनस्य दर्शनं स्पष्टीकर्तुं समर्थाः सन्ति। अस्मिन् जीवनदर्शने तत्सर्वासाम् अनुभूतिघटनाक्रियाप्रतिक्रियाणां प्रतिध्वनिः वर्तते इति कथयितुं शक्यते। प्रायेण उदासीनमनसः चित्रणं,[17] भूत-भविष्य-वर्तमानानां वितृष्णानां च[18] चित्रणं वर्तते। कथासु एकाकिमनसः विशृङ्खलाभिरुत्पन्नानां व्यथानां स्वराः वर्तन्ते। अत्र न केवलं विसङ्गतीनामपितु तज्जन्यानां मानसिकयन्त्रणानामपि रूपायणं वर्तते। अत्र न केवलं विडम्बनानां सर्जनं वर्तते अपितु तज्जन्यमनोदशाना-मपि रूपायणं कृतमस्ति। अत्र न केवलं विपरीतपरिस्थितीनां संघर्षरतानि चरित्राणि वर्तन्ते अपितु तदान्तरिकद्वन्द्वानामभिव्यक्तिरपि वर्तते। एतासु कथासु बाह्यपरिस्थितीनां सर्जनस्थाने मानवमनसः आन्तरिकभावान्, दशामनोदशाः, आशा-भग्नाशा-निराशाश्च जीवयन्तः चमत्काराः सन्ति। अत्र मनसः विविधावस्थानां विश्लेषणं वर्तते। पाठकः कथा-पात्रस्य मानसिक-यात्रायां बहुवर्णधर्मिणः आन्तरिकजगतः अनेकचित्रैः[19] समविषयसंवेगैः,[20] उत्थान-पतनैः,[21] वक्रमार्गैः,[22] विश्रामस्थलैश्च चलन् काभिश्चित् विलक्षणैः परिचितापरिचितानुभूतिभिः सह साक्षात्कारं करोति।[23] प्रत्येकं कथायाः आरम्भे कथायाः दार्शनिकपक्षाः[24] कथासाररूपेण प्रतीकात्मकशैल्यां



निबद्धाः वर्तन्ते।[25] परम्परमभिन्नैः लेखकीयवैशिष्ट्यैः युक्ताः इमाः कथाः[26] कथा-जगति शिल्पदृष्ट्या नवीनद्वारम् उद्घाटयन्ति।[27]

जीवनस्य प्रत्येकस्मिन्नायामे मानवमनसः संवेदनशीलक्षणानां गाम्भीर्यमापनस्य क्षमता लेखकस्य प्रत्येकं कथायां विद्यते। डॉ. दाशस्य 'शून्यनाभिः'[28] इति कथासंग्रहस्य विचारभूमिः दार्शनिक्यस्ति। संग्रहे संकलिताः सप्त कथाः कस्यचित् प्रश्नस्योत्तरेण सह विरचिताः प्रतीयन्ते। कतिपयानां प्राचीनानामसमाहितप्रश्नानामुत्तराणि लेखकः अत्यन्तं रोचकोदाहरणैः संयुक्तानामुपनिषदीयतत्त्वानां माध्यमेन अन्वेष्टुं प्रयासमकरोत्। शीर्षककथां विहाय सर्वाः कथाः संक्षिप्त-साङ्केतिक-कथावस्तुन्याश्रिता दार्शनिकधरातले च रचिताः सन्ति। गुरुशिष्ययोः,[29] मातृ-पुत्रयोः[30] वृद्ध-सेवकयोः मुनि-वायसयोः[31] माध्यमेन संवादशैल्यामेतासां कथानां संयोजनं कृतमस्ति।

डॉ. दाशस्य 'निम्नपृथिवी' इति कथासंग्रहः संस्कृतलघुकथासाहित्ये विशिष्टं स्थानं प्राप्तवान्। अस्य कथासंग्रहस्य कथाः शिल्पदृष्ट्या भागद्वयेन विभक्तुं शक्यन्ते। अत्रत्याः कतिपयाः कथाः संकेतान्यनुसरन्त्यः स्वकथालक्ष्यं प्राप्नुवन्ति। इमाः कथाः प्रायेण कस्माच्चित् चिन्तनात् तर्काद् वा उद्भूताः। आसु कथासु सहजमनायासं वर्णनमेव न वर्तते अपितु काल-विशेष-परिस्थितिविशेषाभ्यां प्रभावितानां पात्राणां मनोदशानां सूक्ष्मं चित्रणमस्ति। अत्र व्यक्तेः समयस्य सीमानमतिक्रम्य स्वीयातीतं, स्ववर्तमानं तथा स्वभविष्यं च सहैव जीवति। लेखकः जीवनस्यैतानि घनीभूतक्षणानि कुशलतया स्वलेखन्या कथासूत्तारयति। इमाश्च कथाः वयं मानवमनसः कथाः इत्यपि कथयितुं शक्नुमः। एताः मनोव्यापारात्मिकाः विचारप्रधानाः वा कथाः इत्यपि कथयितुं शक्यन्ते। कुत्रचित् मनसि स्मृतीनां चित्ररूपेण आगमनं, कुत्रचिच्च स्मृतीनां विचाररूपेषु परिणतिः, अतीताद्भूतस्य वर्तमानस्य सूक्ष्मं मानसिकञ्च विश्लेषणमेतासां कथानां शिल्पगताः प्रमुखविशेषताः वर्तन्ते। इदमेव लेखकस्य चिरपरिचितं शिल्पं वर्तते यत् न केवलं तस्मै वैशिष्टं स्थानं प्रददाति अपि च तस्य लेखकीय-विश्लेषणरेखामपि उन्मुखीकरोति।

इतरपक्षे कतिपयाः क्रियाप्रतिक्रियापरकाः कथाः अपि संग्रहस्य महत्त्वपूर्णाः कथाः भवन्ति। आसु व्यक्तिमनसः जीवनस्य च न केवलं साङ्केतिकी अभिव्यक्तिः वर्तते अपितु जीवितवत् परिस्थितीनां रूपायणमप्यस्ति। अत्र जागरूकपरिवेशस्य

चित्रणं वर्तते। कथानके गतिप्रभावसंवेगांश्च च प्रयच्छतां संवादानां मुख्यभूमिका वर्तते। संवादेषु कथापात्राणां विशेषताभिः सह कथावस्तुनः सूचनापि वर्तते। अपरञ्च तेषु लघु-सार्थक-संवादेषु जीवनस्य स्पन्दनान्यपि स्पष्टतया श्रोतुं शक्यन्ते। कतिपयकथानां पठनकाले यत्र-तत्र पात्राणां मुखमुद्राणां द्रवपूरितदृष्टीनां विश्लेषणाभावः कटुतामेवोत्पादयति।

उत्तमपुरुषप्रणाल्याधृतासु एतासु कथासु यद्यपि द्रष्टृरूपेण वक्तृरूपेण वा लेखकः आद्यन्तं तत्र भवति तथापि इमाः समाजस्य अन्यवर्गीयाः कथाः वर्तन्ते। अयं च अन्यपुरुषात्मको वर्गः समाजस्य वर्गः वर्तते यत्र अशिक्षा, शोषणं, निर्धनता-विवशतादयः भवन्ति। एतस्य अन्यवर्गस्य प्रतिनिधित्वं कुर्वन्ति पात्राणि कथानां मुख्यभूमिकायां वर्तन्ते। लेखकस्य उत्तम-पुरुष-प्रणाल्याधृतायाः कथाशैल्याः मुख्यविशेषता इयं प्रतीयते यत्तासु प्रायेण कथाकारः (नायकः) केन्द्रे न वर्तते। सः कथायाः तटवर्ती वर्तते समाजस्य च विदूरयथार्थस्य चित्राङ्कनसमये मार्मिकलेखनी तस्य हस्ते स्थिता भवति। अस्मिन् संग्रहे सामयिक-सामाजिक-सम्बन्धानां सूक्ष्मतया चित्रणं विद्यते। लेखकस्य लेखनी प्रतिक्षणं सतर्कतया चलन्ती जीवनजगतोः स्पन्दनानि सरलतया कथासु अङ्कयति।

एतासां कथानां प्रारम्भः मर्मस्पर्शिनां नाटकीयसंयोगानां विधानैः कृतः। स्मृतीनां शृङ्खलासु आबद्धाः वर्तमानस्य विवशताव्यग्रतासंवेदनापूर्णा भावनाः स्वाभाविकप्रवाहे कथास्ववतार्यन्ते। संग्रहस्य कतिपयाः कथाः एतादृश्यः वर्तन्ते याः अन्ते द्वन्द्वात्मक-यथार्थपरिस्थितीनां सर्जनेन पाठकं चिन्तया अतृप्त्या वा आपूरयन्ति। कतिपयाः कथाः एतादृश्यः वर्तन्ते याः एतैः द्वन्द्वैः सह आरब्धाः सन्ति। एतासां कथानामारम्भः जीवनादिशायाः सङ्केतेन भवति।

अस्य संग्रहस्य प्रथमकथा वर्तते 'युगान्तिका'[32]। अत्र रात्र्याः अन्तिमप्रहरस्य निर्मलशान्तिं विदारयतः नवजातशिशोः निर्ममचीत्कारध्वनिः कर्णपुटेन मनोमस्तिष्कस्य धमनीषु प्रविष्टा जाता। अस्यां कथायां कस्याश्चिद् विक्षिप्तायाः अबलायाः सद्योजातशिशोः चीत्कारः मूल्यमानकानां घोषणां कुर्वतः,[33] आदर्शगल्पं कुर्वतः, मानवतापथे अग्रेसरतश्च सभ्यसमाजस्य विद्रूपता-संस्कारहीनता-निर्दयताऽमनुष्यताश्च सूचयति। इदं दृश्यं राजमार्गस्य वर्तते। अत्र राजमार्ग इति कथयित्वा लेखकः शोषकान्



शोषितांश्च समाजस्य उच्चतमवर्गेण सम्बद्धान् अकरोत्। अत्र शासनव्यवस्थायाः न्यायव्यवस्थायाश्च वैवश्यं चित्रितं कृतम्। "इमामुन्मादिनीं प्रति न्यायः कुत्र च शिशुः तस्य जन्मदिनमपि द्रष्टुं नाशक्नोत्"[34] इति कथायाः अस्मिन् अन्तिमे वाक्ये दुःखिमातृत्वं निर्दोषबालत्वं सामाजिकनिर्ममत्वं तथा च न्यायिकविवशता चोद्दीप्ता भवति। अस्यां लघुकथायां लेखकः अत्यल्पशब्देषु समाजस्य यथार्थतायाः सूक्ष्मविश्लेषणे सफलतां प्राप्तवान्। एवमेव कथा स्वकथ्यं प्रस्तोतुं नितरां समर्था वर्तते।

अनेकाः कथाः मानवमनसः तर्कावस्थायाः चरमपरिणतिरूपेण विकसिताः सन्ति। मनसः एताः अवस्थाः जीवनजगद्भ्यां स्वाभाविकरूपेण योजयितुं लेखकः सामाजिकव्यवहारस्य अप्रतिमावबोधस्य संवेगात्मकानुभूतीनां च परिचयमददात्। लेखकस्य संवेदनशीलं मनः समाजस्य प्रत्येकं दुःखिनः चिन्तनशीलमनसः यात्रां कुर्वत् तत्र विद्यमानान् अन्तरङ्गतरङ्गान् सूक्ष्मतया सह आत्मसात्कुर्वद् दृश्यते। तथा तेभ्यः तरङ्गेभ्यः तस्य लेखनी कुशलतया विविधपात्राणां पृष्ठभूमौ च सर्जनमाध्यमेन भावनात्मिकीम् अभिव्यक्तिं दत्त्वा कथाकलायां नवीनमायामं योजयति। डॉ. दाशस्य परिचयं वयं संस्कृतकथाजगति नवक्षितिजे वा अन्वेषकरूपेण कर्तुं शक्नुमः। न केवलं वस्तुदृष्ट्यापितु शिल्पदृष्ट्या अत्र भाषाया अपि नवीनं सार्थकं प्रेरणार्थकं रूपं च द्रष्टुं शक्यते। अनेके नवकथाकाराः तस्य शैल्या अनुकरणं कुर्वन्तः दृश्यन्ते। यथा डॉ. रवीन्द्रकुमारपण्डामहोदयस्य छिन्नच्छायायां क्रियापदानां लोपः तस्य भाषायां नवीनगतीः लयस्य चाधानं करोति। अत्र निहितार्थाः प्रमुखाः सन्ति न तु शब्दार्थाः। कथानां बहुसोपानेषु (खण्डेषु) विभाजनं तासां संक्षिप्तकलेवरेषु विस्तृत-भावभरणदृष्ट्या सहायकं प्रतीयते। एवं वयं कथयितुं शक्नुमः यद्रचनादृष्ट्या डॉ. दाशस्य कथाः न केवलं सहजानायासाभ्यां लिखिताः प्रत्युत यथार्थस्य विषयानङ्गीकृत्य, तान् सन्तुलितान् कृत्वा लिखिताः सन्तीति। विषमपरिस्थितिभिः संर्घषशीलमनसोऽनुभूताः कुशलतया च व्यक्ताः सन्तीमाः कथाः।[35] तस्य कथाः शिल्पप्रस्तुतीकरणाय नवीनप्रयोगाः। अत्र लघुकथानकानि सन्ति। किन्तु मनसि आगताः घटनानां प्रभावाः दीर्घाः।[36] कथाः घटनानां स्मृतिषु तं प्रभावं मापयन्त्यः दृश्यन्ते। इमाः कथाः विचारकार्यशैल्योः गाम्भीर्ये गन्तुं प्रयासरताः दृश्यन्ते। प्रायेण घटनायाः अभिव्यक्तये अतीतेन सहैव वर्तमानं चलति। अपि चैतयोः सामञ्जस्ये कथायाः सफलता निहितास्ति। यत्र इदं

सामञ्जस्यं सन्तुलितं तत्र कथा समीचीना भवति। यथा-युगान्तिका,[37] स्मितस्यन्दा,[38] श्वेतवसन्तः,[39] निर्वसनम्,[40] इदं वनम् इयं ज्योत्स्ना[41] इत्यादयः कथाः। संग्रहस्थ-शिल्पस्यैका विशेषतापि वर्तते यदत्र प्राचीनकथानकमपि नवीनप्रकारेण प्रस्तुतमस्ति। तस्य कथाः भाषाशिल्पनिर्माणदृष्ट्या भिन्नाः सन्ति। इदं तथ्यं संस्कृत-लघुकथा-विकास-प्रसङ्गे द्रष्टुं शक्यते।

'एकदा' तथा 'महान्' च तस्य द्वौ बालकथासंग्रहौ वर्तेते। 'एकदा' इति कथासंग्रहे दश बालोपयोगिन्यः कथाः सन्ति। विवादः,[42] धनम्,[43] सत्यम्,[44] अभिमानम्,[45] मृदुः,[46] अहिंसा,[47] तिरस्कारः,[48] अभयम्,[49] समदर्शी,[50] दैनन्दिनीत्यादयः[51] सर्वाः कथाः बालकेभ्यः शिक्षासंस्कारौ प्रददति।

**2. बनमाली बिश्वालः** (1961, जाजपुर, ओडिशा)- संस्कृत-साहित्योद्यानस्य लघु-कथा-नाम्न्याः सुरम्यवाटिकायाः कश्चन चर्चितः कुशलश्च वाटिकाकारो वर्तते डॉ. बनमाली बिश्वालः। डॉ. बिश्वालस्य अद्यावधि त्रयः कथाः-संग्रहाः प्रकाशिताः सन्ति। नीरवस्वनः (1998), बुभुक्षा (2001), जिजीविषा (2006)। एषु संग्रहेषु समाजस्य सहजसुलभजीवनदृश्यानां यथार्थपरकाणि स्वाभाविकानि जीवितवच्च चित्राणि चित्रितानि सन्ति। शिल्पशैलीभाषाभावबोधेषु च आधुनिकतां योजयन्त्यः संक्षिप्तकलेवरयुताः समर्थवस्तुविधानपराश्च कथाः अत्र संगृहीताः सन्ति।

अत्रत्याः कथाः कथाकारस्य बह्वायामयुतविचारविस्तारं बोधयन्ति। एवं प्रतीयते यत् कथाकारः समाजस्य विभिन्नवर्गेषु वैचारिकविचरणं कृत्वा तेषां समस्यानां समाधाने सक्रियभूमिकामपि निर्वहतीति। अपि च तेषामावश्यकताशापेक्षाव्यथाविवशताश्च अनुभवात्मकसंवेदनापरकतरलताभिः उद्भाव्य स्वरचनाकर्म सम्पादयति।

सर्वथा पृथक्-पृथग् विषयान् गृहीतवतीषु एतासु एतत् स्पष्टीभवति यत् लेखकस्य संवेदनानां क्षितिजं विस्तृतं गम्भीरञ्च वर्तते। तासु व्यक्तिसमाजयोः सरल-जटिल-सम्बन्धानामवबोधानाञ्च जिज्ञासा वाच्छा च वर्तते। लेखकः न केवलं सामाजिकपरिस्थितीः विचारयति, अपि च ताः आत्मसात्कृत्य स्वसंवेदनात्मक-विविधभावतरङ्गैश्च ताः रससिक्ताः कृत्वा बहुवर्णविशिष्टाः कथाः प्रस्तौति। लेखके न केवलं सहजता, लोकचेतना च वर्तेते, अपितु सहृदयात्मिका दृष्टिरपि द्रष्टुं शक्यते। सः पाठकेभ्यः अनायासम् एतादृशं भावपथम् उपलब्धं कारयति येन एतद् ज्ञातुं न



शक्यते यत् सः कथां पठति अथवा तामेव जीवति। कथां संस्पृश्य पश्यति अथवा दृष्ट्वा शृणोति। लेखकः मानवीयकरुणां व्यथितान् दुःखितान् वा कथानां मूले प्रतिष्ठापितवान्। स्वकथासु गतिमच्चित्रणं प्रस्तुतं न तु स्थिरं चित्रणम्। एतच्च चित्रणं तस्य उद्भावकशक्तेः सर्जनात्मकशक्तेश्च परिचायकं वर्तते। सः कथासु आधुनिकभावबोधं विषयं कृत्वा परम्परागतजडमान्यताः प्रति विग्रहे, नाट्यमानाः पुरातनावर्जनाः, परिवर्तितमनः, विचारधाराः रूपायितवान् अपि च नवीनमूल्यमानकानां स्थापनमपि कृतवान्।

संग्रहस्थानां कथानां पठनकाले वयं तीव्रतया इदमनुभवामः यत् सामान्यान् गम्भीरांश्च उभयविधान् पाठकान् आकर्षयन्त्यः इमाः कथाः अस्माकं निकट-परिवेशादुद्धृताः बहुसंख्याकाः मर्मस्पर्शिन्यः कथाः समाजस्य शोषितवर्गस्य प्रतिनिधित्वं निर्वहन्ति। अयं वर्गः सर्वथा पीडितो वञ्चितश्च वर्तते तथा स्वास्तित्वाय संघषशीलः च वर्तते। नैतिकानैतिकचिन्ताभ्यः अयं वर्गः दूरे वर्तते। एतासु कथासु वयमात्मानमेतादृशानां जनानां निकटे प्राप्नुमः ये सामाजिकमूल्यानां चर्चां नैव कुर्वन्ति किन्तु ज्ञानेनाज्ञानेन वा तानि जीवन्ति। वस्तुतः एतेषां संग्रहाणां पठनकाले स्वसमयस्य पठनानुभवः स्वतः भवति। एतासु कथासु वर्तमानसमाजस्य दृढयथार्थेन पाठकस्य साक्षात्कारो भवति। अपि च भाषाशिल्पयोः स्तरेऽपि विशिष्ट-प्रकारिकायाः परिपक्वतायाः आधुनिकतायाश्च दर्शनं भवति यदेतासां वारं वारं पठनीयानां श्रेष्ठानां कथानां दृढ आधारो वर्तते। एतासां पृष्ठभूमौ वास्तविकानुभवानां तापो वर्तते यस्य शक्तिं पाठकः निरन्तरतयाऽनुभवति। अत्र मानवमस्तिष्कस्य सहजासहजाः सरलजटिलाश्च अभिव्यक्तयः सन्ति।

साहित्यकारस्य संवेदनशीलं हृदयं मानवमात्रस्य पीडा व्यथा वा प्रेरयति। व्यथैव तस्य कथानां मूलविशेषता एव। असमानवर्गे विभाजितस्य वर्तमानसमाजस्य अनेकानेकविसङ्गतयः तस्य कथानां धरातलं वर्तन्ते। समाजस्य उपेक्षितपात्राणां सूक्ष्ममनोदशायाः निरीक्षणं तस्य सहजमार्मिकाभिव्यक्तिः कथासंग्रहस्य समस्तकथासु दृश्यते। विवशमानवस्य शारीरिक-मानसिक-सामाजिक-व्यथानां स्वाभाविकसर्जनाय विविधकाल्पनिकपरिस्थितीनां यथार्थतायाः प्रकाशे सहजसर्जनं वर्तते।

1998 तमे वर्षे प्रकाशिते 'नीरवस्वनः' इत्याख्ये कथासंग्रहे संगृहीतासु

एकत्रिंशत्संख्याकासु लघुकथासु डॉ. बिश्वालः समाजस्य दीनहीनाभावग्रस्तोपेक्षित-वर्गमेव विषयीकृतवान्। ग्राम्यसभ्यतायाः निकटे विचरन्त्य इमाः कथाः स्वविषयवस्तु-माध्यमेन अत्याचारशोषणोपेक्षाव्यथाभिः सन्त्रस्तं जीवनं जीवतां मूकपीडितानां पीडाभ्यः कश्चित् साङ्केतिकं स्वरं प्रददति। कासुचित् कथासु आधुनिकनगरसभ्यतां प्रत्याक्षेपोऽपि वर्तते। मार्मिकतायथार्थतास्वाभाविकतादिभिः गुणैः आप्लावितः सम्पूर्णः कथासंग्रहः सरलहृदयमूकप्रायाणां विवशशोषितोपेक्षितानां चरित्राणां व्यथां क्षेत्रियपरिवेशे, आञ्चलिकसंस्कृत्यां, वास्तविकतायाः प्रकाशे च अभिव्यनक्ति। लेखकस्य कथासु लोकजीवनस्य विविधवर्णानामवतारणं संस्कृतसाहित्ये नवीनतायाः सूचकं वर्तते।

एकस्याः अबलायाः विक्षिप्तताजन्यदुर्दशायाः मार्मिकं चित्रं प्रकटीकरोति 'चम्पीति'[52] कथा। तत्र न केवलं यौनशोषणस्य अपितु समाजस्य विकृतपरिहासस्य च अभिव्यक्तिः वर्तते। स्वयमेव निजव्यक्तित्वस्य स्वामिनः कथानायकस्य टिन्-टिन्-वृद्धस्य व्यथायाः साङ्केतिकाभिव्यिक्तः कुर्वती 'टिन्-टिन-वृद्धः'[53] इति कथा करुणाः सृजति। अत्र ग्रामीणमानसिकतायाः चित्रणं ग्रामस्य सर्वेषां बालकानां हास्यपात्रभूतः एकः वृद्धः भिक्षुकः वर्तते यं सर्वे बालकाः परिहसन्ति। कश्चित्तं 'टिन्-टिन्-वृद्धः' इति कथयति, कश्चिदपरस्तदुपरि लोष्टं प्रक्षिपति। सः क्रोधेन अपशब्दान् वदति चेत् जनाः आनन्दं प्राप्नुवन्ति। कथायां वृद्धस्य करुणान्तः मर्मान्तकपीडां प्रकटीकरोति। महतीयं विडम्बना अस्ति यत् जीवनपर्यन्तं तस्य इच्छायाः विपरीते स्थित्वा जनाः तमावेष्टितं कृत्वा विक्षुब्धं कुर्वन्ति, परन्तु अन्तिमयात्रासमये सः एकाकी एव वर्तते।

'हसुराबाबा'[54] इति स्वनाम सार्थकं कुर्वन् हसुराबाबाः सुखदुःखयोः समभावेन प्रसन्नचित्तेन च निवसति। एवं सः किञ्चिद् विशिष्टव्यक्तित्वं च धारयति। इदमेतादृशं चरित्रं वर्तते यः आध्यात्मिकज्ञानाभावे, रुच्यभावेऽपि परिस्थितिवशीभूतः संन्यासिवेशं धृत्वा सांसारिकसुखदुःखाभ्यां विरहितः सन् मादकधूमेन लिप्तः आप्यायितश्च सहजभावेन एव स्वव्यतीतजीवनस्य कथाः कथयति।

एवमेव संग्रहेस्मिन् कुत्रचित् सामाजिकमान्यताकारणात् कश्चन 'अशुभमुखः'[55] एकाकी वर्तते, कुत्रचिदपरत्र च वामनस्य 'पितृप्राणस्य'[56] व्यथैव, कुत्रचित् सुखदुःखभावैः विहीनः संन्यासजीवनं यापयन् हसुराबाबाः अस्ति।[57] कुत्रचिदपरत्र[58] जीविकार्थं महानगरे आगतानाम् असामाजिक-तत्त्वानाम् आखेटभूतः जगमोहनः तथा



पद्मायां त्रिभिः बालकैः सह जीवनयापनाय विवशा तारा दृश्यते। एवं प्रकारेण इमाः कथाः पाठकान् पीडायाः नवीनधरातलेन परिचितान् कारयन्ति। एतादृशानां जीवत्-पात्राणां सर्जनं लेखकस्य सूक्ष्मदृष्टेः परिचायकमेवास्ति। एवमेव एताः कथाः तस्मै महत्त्वपूर्णस्थानप्रदानायापि समर्थाः वर्तन्ते।

प्रस्तुतकथाकारेण स्वलघुकथासु महत्यो व्यथाः सतर्कताकुशलताभ्यां प्रस्तुताः। एताः कथाः रूपविन्यासदृष्ट्या स्वाभाविकतासहजतादिवैशिष्ट्येन युक्ताः कौतूहलं चमत्कारं चोत्पादयितुं समर्थाः सन्ति। कथ्येषु कल्पनायथार्थयोः सन्तुलनं प्रशंसनीयं वर्तते। आडम्बररहिता कृत्रिमताविहीना जटिलतामुक्ता च भाषाशैली सामान्यपाठकेभ्यः सुगमसहजभावभूमिं प्रददाति।

कथासु निर्धनवर्गः अभावसामाजिकविषमतातले दलितः निष्पेषितश्च प्रदर्शितः। साहित्यकारे सामाजिकव्यवहारबोधः तस्य मार्मिकचित्रणस्य सामर्थ्यमावश्यकं न तु तस्याः समस्यायाः समाधानम्। आसु कथासु समस्याविसङ्गतिपरिस्थितिमनोवैज्ञानिकप्रभावाः परस्परव्यवहारकुशलानि सूक्ष्म-मार्मिक-दृश्यानि तथा च प्रायेण आदर्शोन्मुखमर्यादा-प्रेरित-समाधानस्य प्रयासः अपि वर्तते। दुर्बलतानां विकाराणां च यथार्थाङ्कनानन्तरं लेखकस्य रचनासंसारः मर्यादायाः दुर्गनिर्माणं करोति। अतः कथाः पाठकस्य ध्यानं समस्यायाः चरमबिन्दुं प्रति नयन्ति यत्र समाजस्य मूकपीडा न केवलं मानसपटलं स्पृशति अपि च तत् मुखरितं करोति।

संस्कृतसाहित्यस्य परम्परां पश्यामश्चेदिदं स्पष्टीभवति यदेषु त्रिषु संग्रहेषु नवीनतायाः यथार्थः समुचितश्च च समावेशः एवास्ति। कथानकानि कामपि परिणतिं न प्राप्नुवन्ति। अपितु कस्यचिद्यथार्थानुपातस्य भावोत्कर्षस्य स्थित्यां करुणपर्यवसानं लभन्ते। एषैव आधुनिकविशिष्टतास्ति। कथानां संक्षिप्तकलेवरं यावदावश्यकं समर्थं च वस्तुविधानं, जीवनस्य लघुघटनानां मार्मिकाणि चित्राणि, कुशलकथागुम्फनं, सम्प्रेषणीयतादयः लघुकथानां सर्वाः विशेषताः त्रयाणां संग्रहाणां प्रत्येकं कथायां वर्तन्ते। इमाः कथाः समुचितशब्देषु साररूपेण व्यक्ताः सन्ति, अत एव लघुकायाः वर्तन्ते। यत्र तत्र विस्तृतविषयवस्तुनः संक्षिप्तीकरणात् कथायाः भावात्मकविचारात्मकौ पक्षौ अपुष्टौ प्रतीयेते किन्तु कथाः लघुकथायाः लघुतां पूरयितुं समर्थाः, स्वलक्ष्यं च प्राप्तुं समर्थाः सन्ति।

'बुभुक्षायां' संगृहीतायाम् 'अपूर्वपारिश्रमिकम्'[51] इति कथायां कस्यचिद् बालकस्य व्यथा चित्रिता वर्तते यः बुभुक्षाशान्त्यर्थं पादत्राणकुर्चनाय बाध्यो वर्तते। निर्दोषः पपुनाः कथायाः प्रमुखपात्रं वर्तते यत् परिवारस्य पोषणाय पादत्राणं स्वच्छीकरोति। अत्र सामाजिकविषमताभ्यः उत्पन्नानां विचारगत-कर्मगतविसङ्गतीनां मार्मिकं चित्रणं वर्तते। एकस्मिन् पक्षे उच्चवर्गीययुवकानां विलासमयं जीवनमितरपक्षे च निम्नवर्गीय'पपुना' इत्यस्य विपन्नताग्रस्तसंघर्षः वर्तते। एकस्मिन् पक्षे धनस्य दुरुपयोगः इतरपक्षे च जीवनस्य मूलावश्यकतानां पूर्तेः स्वप्नः। एकस्मिन् पक्षे वातानुकूलितकक्षे अश्लीलचलचित्रं पश्यन्तः नवयुवानः, अपरस्मिन् पक्षे पपुनाः तथा च तस्य नित्यं निर्मितो नित्यं नष्टश्च दिवास्वप्नः वर्तते। एकस्मिन् पक्षे विलासितापूर्णजीवनशैल्याः पथभ्रष्टाः नैतिकतासदाचारादर्शमूल्येषु सर्वथा अपरिचिताः नवयुवकाः, इतरपक्षे च जीविकायै संघर्षरतः अपितु मानवीयमूल्येन युक्तः पारिवारिकदायित्वपूर्तेः स्वप्नेन युक्तो निर्धनो बालको वर्तते। पथभ्रष्टाः नवयुवकाः बालश्रमिकाय पारिश्रमिकस्थाने ताडनं ददति। बाल्यावस्थाकारणात् युवकानां विरोधं कर्तुम् असमर्थस्य बालश्रमिकस्य शोषणं करुणाः सृजति। तेषाम् अत्याचारः सभ्यसमाजस्य लेपरूपरहितस्य यथार्थस्य उद्घाटनं करोति। कथापाठकस्य मर्मणि आघातं कर्तुं समर्था। कथाप्रयुक्ताः संवादाः लेखकस्य दृष्टिं कथायाः मूललक्ष्यं च स्पष्टीकर्तुं सहायकाः सिद्ध्यन्ति। इमे संवादाः लघुस्वाभाविकतारतम्यैश्च युक्ताः। यथा 'अपूर्वपारिश्रमिकम्' इति कथायां मादकद्रव्याणां सेवनेन नष्टबुद्धयो युवकाः पारिश्रमिकस्थाने बालकं बलात् मदिरां पाययित्वा मुष्टिकाभिः ताडयित्वा वदन्ति - ''अपि एतत् पर्याप्तम्? उत इतोप्यधिकं खादिष्यति, पास्यति च'' इति सोत्प्रासम् अपृच्छत् तेष्वपरः। ''नहि नहि महाशयाः। आकण्ठं भुक्तं पीतं च मया। बहु उपकृतं भवद्भिः। महती भवतां सुजनता। ईश्वरः भवतः मङ्गलं विदधातु।'' उपर्युक्तांशः द्वयोः भिन्नवर्गयोः संस्कृतिं मानसिकतां च स्पष्टीकर्तुं सहायको वर्तते। कथा च स्वस्य उद्देश्यं प्रेषयितुं समर्थः प्रतीयते।

अन्यकथासु कुत्रचित् मध्यमवर्गस्य निरर्थकप्रदर्शनभावनां विवशतां च व्यक्तीकरोति 'कदा आगमिष्यति दूरभाषः'[60]। अपरत्र कुत्रचित् सामाजिकोत्पीडनं विषयं कृत्वा लिखितायां 'तमसा आच्छन्ना दीपावली'[61] इत्यस्यां कथायां पुञ्जिवादिनस्समाजस्य



चित्रणं वर्तते। 'दुश्चरित्रा' इत्यस्यां कथायां नार्याः सहजोन्मुक्तः व्यवहारो वर्तते, अपरत्र स्वजनैरेव वञ्चितायाः अबलायाः शङ्कर्याः मातृत्वपीडायाः चित्रणं 'वासुदेवस्य जन्मदिनम्' इत्यस्यां कथायां वर्तते।

कुत्रचित् 'राजधानीयानेन राजधानीयात्रा'[62] इति कथायाम् अज्ञानतया अनुभवहीनतया हास्यपात्रभूते द्वे मित्रे स्तः, क्वचित्तु 'लोभासक्तः कथाकारः'[63] इति कथायां कस्यचित् साहित्यकारस्य लोभपरायणता वर्णितास्ति। कुत्रचित्[64] समाजस्य अन्तहीनोपेक्षया पीड़ितस्य देवदासस्य करुणजीवनगाथा वर्तते, क्वचित्तु समाजस्य दीनहीनताः प्रकटयन्त्यां 'बुभुक्षा'[65] इति कथायां परिस्थितिभिः संघर्षयुतानां पात्राणां करुणकथा विद्यते।

एताः कथाः अस्मान् जीवने जगति च अतिगहनतायां नयन्ति। एतासां कथानां माध्यमेन अस्मासु पूर्वतः अधिकतया अनुभूतिमयतायाः भावबोधतायाः सामाजिक-संवेगतायाः, विचारमयतायाः, कर्मगतजीवद्वृत्तेः कर्मण्यतायाश्च सञ्चारो भवति। प्रायेण प्रत्येकं कथायां समाजस्य विविधानां पक्षाणाम् उद्घाटकानि चित्राणि प्राप्यन्ते। निम्नवर्गीयसमाजमधिकृत्य लिखितायां 'जिजीविषा'[66] इत्यस्यां कथायां परिस्थितेः, जीवनस्य, जिजीविषायाश्च बलेन अग्रे वर्द्धमानानि पात्राणि सन्ति।

'मध्येस्रोतः'[67] इत्यस्यां कथायां जीवनस्य विदीर्णयथार्थस्य सन्तापे संवेगात्मक-पक्षधरता रूपायिता। नाचम्मा राजारेड्डी च स्वलघुनि परिवारे प्रसन्नतापूर्वकं जीवनं यापयन्तौ स्तः। कथायां मत्स्यजीविनां धीवराणां संपूर्णदिनचर्या तेषामेव परिवेशे वर्णिता। बुभुक्षा शिशुकन्यायाः प्राणरक्षाचिन्ता च नाचम्मां स्वपातिव्रत्यधर्मं त्यक्तुं विवशीकरोति, पतनशीलवृत्तिं प्रति च नयति। परिस्थितयः कदाचित् मनुष्येभ्यः विचाराय एकं क्षणमपि न प्रददति तथा च तं स्वदासं निर्माय पतनस्य गर्ते पातयन्ति। अत्रापि अबोधा नाचम्मा अतिथेः भोजनव्यवस्थां सरुचि करोति तथा स्वसरलतावशा-दतिथेः पादसेवाप्रस्तावमपि स्वीकरोति। एतेषु एकान्तक्षणेषु सा कदा कस्मिन्नावेशे स्वासंयमितभावनया पतनमार्गे अगच्छदिति सा कथमपि नावगतवती। कथायामेकस्याः स्त्रियाः परिस्थितिभ्यः पराजयतायाः यः सङ्केतोऽस्ति, सः प्रकारान्तरेण स्त्रीशक्त्याम् अनास्थाभावमपि द्योतयति।

एकतः राजारेड्डी स्वपरिवारस्य आजीविकायै स्वकार्यक्षेत्रं (मध्येस्रोतः) गत्वा न

प्रत्यावर्तते। अपरं च सः आगमिष्यति न वा इति संशयः नाचम्मया सह पाठकान् विचारावर्ते पातयति। तत्रैवापरतः समाजस्य स्वार्थात्मिकायाः अवसरवादितायाश्च बलिभूतायाः नाचम्मायाः जीवनं मध्यावर्ते वर्तते। सुखपूर्णं जीवनं यापयतोः धीवरदम्पत्योः जीवने आगतेन समयरूपिणा झञ्झावातेन तयोः जीवनमावर्तमध्ये आबद्धं वर्तते। नित्यमायः नित्यं व्ययः च तयोः धीवरदम्पत्योः जीवनक्रमः वर्तते। राजारेड्डी एकः परिवारपरायणः अल्पायभोगी च धीवरः अस्ति। सः स्वशिशुकन्यायाः नाचम्मायाः च भोजनेन्धनयोः व्यवस्थां कृत्वा स्वसागरीययात्रायां गच्छति। यदा राजारेड्डी पञ्चदिनानन्तरं न प्रत्यावर्तते तदा जनेभ्यः राजारेड्डिनः विषये भिन्नाः भिन्नाः आशङ्काः श्रुत्वा तदीयाः समस्ता आशाः नैतिकताः, मूल्यमान्यताश्च केषुचिदेव क्षणेषु बुभुक्षाग्नौ भस्मीभूताः भवन्ति। नाचम्मा, या सर्वदा राजारेड्डिनः संरक्षणे गृहे एव निवसति, तस्याः बाह्यजगता संघर्षेण छलछद्मभिश्च न कश्चन परिचयो वर्तते। एतादृशी अबोधा, सामाजिकजीवनेन अपरिचिता सा पत्युः अनुपस्थितौ सामाजिककुतत्त्वानां बलिर्भवति। धनाभावे आपणिकेन प्रत्याख्यातापि सा तदीयापणे स्वशिशुकन्यायाः तथात्मनः च भोजनव्यवस्थायै गच्छति। आपणिकः तदीयां विवशतामवगम्य स्वकीयां कुटिलयोजनां साकारां कर्तुं स्वकीयमित्रातिथ्य-प्रस्तावं तस्याः समक्षं प्रस्तौति। परिस्थितिभ्यः पराजिता आपणिकस्य मन्दोद्देश्यस्य अज्ञानाच्च सरलहृदया नाचम्मा आपणिकमित्रस्य रात्रिभोजनाय शयनाय च स्वकीये गृहे व्यवस्थां कुरुते। एतादृश्यां स्थितौ सा किमपि आत्ममन्थनं नैतिकचिन्तनं च न करोति। क्षणिक-मानवीय-दुर्बलतायाः समक्षमात्मसमर्पणं कुर्वत्याः नायिकायाः चरित्रं तत्समाजस्य, तद्वर्गस्य च प्रतिनिधित्वं करोति यत्र कश्चिज्जनः स्व-कोमल-संवेदनाः त्यक्तुं सर्वथा विवशो भवति।

सामाजिक-संबन्धेन संस्कारवत्याम् 'अपूर्वः त्यागः'[68] इत्यस्यां कथायां भाषागता तथा च शिल्पगता विशिष्टता परिपक्वा दृश्यते। कथायामधिकारिणः अधीनस्थस्य च माध्यमेन मानवीयदुर्बलताः, भावात्मकसंबन्धान्, पारिवारिक-मूल्यानि च प्रति समर्पणभावमाध्यमेन आधुनिकसंस्कृतेः अन्वेषणाय सफलः प्रयत्नोऽस्ति।

अत्रत्यासु प्रायः सर्वासु कथासु सामाजिकसंबन्धाः निरन्तरमेव लेखककृतस्य चिन्तनस्य केन्द्रे प्रतीयन्ते। तस्य विस्तृतभावजगति मानवीयसम्बन्धाः नैकात् कोणात् स्पृष्टाः 'वंशरक्षा'[69] इत्यस्यां कथायां पुत्रमोहादुपन्नाः घातकपरिस्थितयः सरलभाषायाः



तरलप्रवाहे अभिव्यक्तीकृताः। 'भिन्ना पृथ्वी'[70] इत्यस्यां कथायाम् एकस्याः स्त्रियाः सुशीलायाः दशाः, दुर्दशाश्च चित्रितास्सन्ति। न केवलम् इयमेका निम्नवर्गीयजीवनस्य कथास्ति, किन्तु अभावानां च कथास्ति। अस्यां बुभुक्षायाः,विवशतायाः, दयनीयताञ्च जीवनं वहन्ति क्षणे त्रुटन्ति विशृङ्खलितानि पात्राणि सन्ति। अथवा विविधेषु व्यसनेषु सुखस्य मृगमरीचिकाम् अन्विष्यन्ति विचारणीयानि चरित्राणि सन्ति।

'धूमायितं कैशोरम्'[71] इत्यस्यां कथायाम् उच्चवर्गीयं निम्नवर्गीयं च बाल्यं (शैशवं च) रोदनशीलं दृश्यते। कुत्रचित् धनाधिक्यं बालकस्य स्वाभाविकाकाङ्क्षाः लुण्ठति, क्वचिद् धनाभावस्य हेतोः बालमनसः सहजाभिलाषाः म्रियन्ते। क्वचिद् धनस्य आगमनागमनाभ्यां परिवर्तनशीलस्य व्यक्तेः चरित्रमस्ति, क्वचित् तु भिन्नवर्गद्वयस्य परस्परं संघर्षोऽस्ति। क्वचिदेकस्मिन्नेव वर्गे पालितपोषितानां चरित्राणां वैचारिकः संघर्षोस्ति। क्वचिच्च शोषितस्य, शोषकस्य च वर्गद्वयस्य मनोविज्ञानमस्ति। एषा कथा बालसमाजगतासु समस्यासु गम्भीरचिन्तनाय पाठकान् विवशान् करोति। 'पापगर्भः'[72], 'नीलाचल'[73] इत्येतस्मिन् यथार्थवादपरके कथाद्वये अपसंस्काररूपाः, अगति-दुर्गतिरूपाः, आधुनिकभावबोधाः समाविष्टाः सन्ति। 'काव्यं कथात्वमागतम्' इति कथा कस्यचित् लेखकस्य संवेदनशीलमनसः यात्रां कारयति। तस्य लेखकस्य रचनासंसारतन्तुभिः अस्माकं परिचयो भवति। एतस्य परिचयस्य क्रमे श्रमिकवर्गे मद्यपानाद् व्याप्ता गम्भीराः समस्या अपि प्रकाशन्ते।

उपर्युक्तानामेतेषां संग्रहाणां कथासु संश्लिष्टानां संबन्धानां परिचयस्य प्रयत्नोऽस्ति। कुत्रचित् अतियथार्थवादस्य आकस्मिककाल्पनिकपरिवर्तनानां चमत्काराधायकमोहात् कथाकारः स्वात्मानं त्रातुम् असमर्थः दृश्यते। किन्तु तेन कथायाः संवेदनातन्त्रे, संवेगात्मकप्रवाहे च प्रतिकूलः प्रभावो न परिलक्ष्यते। नैकाः कथाः दृष्टाः श्रुताः ज्ञाताः मान्याः विचार्याः भुक्ताः सत्योऽपि पाठकान् प्रभावितान् कुर्वन्ति। यतो हि आसु कथासु शिल्पं चिन्तनं च स्तरानुगुणमस्ति। नैकासु कथासु अभिव्यक्ताभिः पारिवारिक-सामाजिकासङ्गतिभिः विदूरताभिश्च आकृष्टः पाठकः चिरं यावत् चिन्तयितुं विवशः भवति।

वर्ण्यविषयानुसारेण बहुवर्णासु एतासु कथासु समाजस्य विभिन्नवर्गेभ्य आगतेषु नैकेषु पात्रेषु बलहीनसंघर्षशीलविक्षुब्धशोषितपीडितपात्राणि दुःखाभिव्यञ्जितानि कृत्वा

लेखकस्य लेखनी तानि प्रति स्वसहृदयसहानुभूतिकरुणाश्च प्रदर्शयति। एषां पात्राणां मनोविज्ञानस्य व्यवहारस्य च सूक्ष्मं सहजं च वर्णनमस्माकं व्यक्तिगत-सामाजिक-संवेदनानां विस्तारेषु सहायकमस्ति। यं समाजं जीवनं च वयं स्वज्ञानानुभव-स्याभांवात् दुर्बलतावशाच्च न जानीमः न वाऽवबोधामः तद्विषये ज्ञानानुभवयोः विकसने इमानि पात्राणि सहायकानि सन्ति। एतानि च पात्राणि मनुष्यस्य मूलनियत्या अस्माकं परिचयं कारयितुं सफलं प्रयत्नम् अकुर्वन्। अत्रोपेक्षितानामभिशप्तानाञ्च भावानां स्वराः मिलन्ति। कुरीतीनां, कुप्रवृत्तीनां मनोविकाराणाम् आधिक्याद् बलिभूतानां पात्राणां व्यावहारिकं मनोवैज्ञानिकं विश्लेषणं कृत्वा एतासु कथासु अस्माकम् सामाजिकस्य व्यक्तिगतस्य च जीवनस्य तमोग्रस्ताः मार्गाः प्रकाशिताः। कथाकारः एतादृशानां विविधपात्राणां रचनाः कृत्वा जीवनजगतोः विस्तारस्य, गहनतायाश्च च अवबोधने पाठकेभ्यः सहायतां प्रदत्तवान्।

एतेषु संग्रहेषु समाजस्य उपेक्षितानां परिचितानां च पात्राणां हृदयस्पर्शि वर्णनमस्ति। अत्र भग्नमनःस्थितीनां जीवनस्य विपन्नतानां विसङ्गतीनां च स्वाभाविकं चित्रणमस्ति। आधुनिकसमाजगतायाः जटिलशैल्याः अत्रत्यं चित्राङ्कनं श्लाघनीयमस्ति। प्रगतिशीलमानवसमाजे मूलभूतावश्यकतानां यथाकथञ्चित् पूर्तये संघर्षरतस्य उपेक्षितस्य शोषितस्य मानववर्गस्य कुटिलताजटिलताविहीनं सुस्पष्टं मर्मभेदि वर्णनं भावप्रधानं विचारप्रधानं वा पाठकवर्गम् आद्यन्तम् आबद्धं करोति। 'एको रसः करुण एव' इत्यपि कथाकारस्य प्रेरणाबिन्दुरस्ति। पीडितानामुपेक्षितानां शोषितानां पीडा तथा तेषां मूकं विवशं च क्रन्दनम् अन्तःस्थलम् आन्दोलयति।

प्रस्तुतलेखके दलितानां, शोषितानां पीडितानां च अन्तःस्थलेषु समाविष्टायाः मूकव्यथायाः गहनतायाम् उत्तीर्य तासां वेदनां समग्रतया सह सहृदयसाक्षात्करण-पूर्वकं तासां भावानुवर्तिसुबोधभाषामाध्यमेन अभिव्यक्तीकरणस्य अद्भुतं सामर्थ्यमस्ति। इदं सामर्थ्यमेव तस्मै साहित्ये अविस्मरणीयं स्थानं प्रददाति।

समाजस्य विविधक्षेत्रेभ्यः, वर्गेभ्यश्च विभिन्नपात्राणां चयनं लेखकस्य सूक्ष्म-दृष्ट्याः परिचायकमस्ति। व्यक्तिगतपारिवारिकसामाजिकवेदनाः सहमानानां पात्राणाम-साधारणानि वैशिष्ट्यानि तथा विविधघटनानां माध्यमेन तेषामुपरि अत्याचाराः, शोषणानि च उद्घाटितानि भवन्ति। दुःखम् अस्य संसारस्य अभिन्नमङ्गमस्ति यत्



सर्वस्थानिकं सर्वकालिकं च वर्तते। लेखकस्य सूक्ष्मदृष्ट्या समाजस्य कोपि वर्गः अस्पृष्टो नास्ति। कथानां भूमिका भिन्नवर्गेभ्यः उद्धृता। पात्रेषु विभिन्नता, घटनासु विविधता च न केवलं पाठकं चमत्करोति अपि तु तेषु संवेदनायाः नवप्रवाहमपि प्रवाहयति। पात्रेषु विभिन्नता घटनासु च न केवलं पाठकं चमत्कारयति अपि तु तेषु संवेदनायाः नवप्रवाहमपि प्रवाहयति। जीवनस्य समाजस्य च विसंगतीः संकेतयन्त्यः एताः कथाः प्रायः व्यथामेव दर्शयन्ति। एतासु कथासु कुत्रचित् पीडा हास्य-व्यङ्ग्य-कलेवरेषु प्रस्तुतीकृता।

एतासु कथासु मानवमनसः, आशानां, निराशानाम्, आस्थानां, प्रतिबद्धतानां, विवशतानामभिशप्तानां च स्थितीनां मध्ये एकां विशेषपरिस्थितिं भोक्तुं सनद्धानां पात्राणां कठिनजिजीविषायाः साक्षात्कारः क्रियते। एतासु संघर्षगाथासु समाजस्य पतनशीलाभ्यः वीथीभ्यः जीवनतन्तूनां चयनस्य प्रयत्न दृश्यते। अस्मिन् निरन्तर-प्रयासे प्रतिकूलासु परिस्थितिषु जीवनस्य मार्गमन्विष्यन्ति इमानि पात्राणि अद्भुत-दुःसाहसेन सामर्थ्येन च शक्तिमन्ति सन्ति।

अत्र अलङ्काराणां भारो नास्ति, समासानां, सन्धीनां भयकारकः प्रयोगो नास्ति, तथा कृत्रिमतायाः, दुरूहतायाः, क्लिष्टतायाः नामापि नास्ति। भाषायाः प्रवाहः, शिल्पस्य नवीनता, शैल्याः सहजता च लेखकस्य परिपक्वतायाः साक्षिणः वर्तन्ते। संवेगात्मकप्रवाहेण रससिक्ताः, भावात्मक-तरलतया उद्भूताः एताः कथाः नित्यं नवपथस्य निर्माणं कुर्वन्ति, स्वात्मनः भूमिकाम् अन्विष्यन्ति तथा च कथासाहित्याय नवा दिशः गतिञ्च प्रददति। संक्षेपेण वदामश्चेदिमाः कथाः डॉ. बनमालीबिश्वालं संस्कृतलघुकथाक्षेत्रे सुप्रतिष्ठितहस्ताक्षररूपेण प्रस्तुवन्ति।

**3. रवीन्द्रकुमारपण्डा** (1964, जाजपुर, ओडिशा) - रवीन्द्रकुमारपण्डा-महोदयस्य 'छिन्नच्छाया'[74] इति कथासंग्रहे विंशतिः कथाः संकलिताः सन्ति। 'प्रणयपीयूषम्'[75] इति कथायाः आरम्भः विचारात्मको वर्तते। अत्र समस्याप्रतिहतगतेः सापेक्षं मानवस्य जीवनयात्रायाः स्वाभाविकं वर्णनं वर्तते। कथानायकः विश्वम्भरः एकवर्षानन्तरं स्वग्रामं प्रत्यागतः। अनाथया वृद्धमात्रा अतिकाठिन्येन पालितपोषितो विश्वम्भरः एकवर्षात् प्राक् ग्रामस्य केनचिदकर्मण्ययुवकरूपेण 'विशुआ' इति नाम्ना प्रसिद्धः आसीत्। परन्त्वकस्मादेकस्मिन्नेव वर्षे प्रचुरधनार्जनेन तस्य स्थितिः

परिवर्तिता। पूर्वकाले अन्यगृहेषु पात्रमार्जनादीनि कृत्वा जीविकोपार्जनं कुर्वती तस्य माता अद्य स्वगृहे ग्रामस्य 'तेजोमहालये' वसति। नैकाः सेवकसेविकाः तस्याः सेवायां नियुक्ताः। सापि काश्चन तीर्थयात्राः कुर्वत्यस्ति। धनागमनेन सह विश्वम्भरस्य परिवर्तितप्रतिष्ठायाः अङ्कनानन्तरं 'सुमिं' प्रति तस्य एकनिष्ठं प्रेम वर्णितम्। बहुविध-विचारानन्तरं विश्वम्भरः विधवया सूम्या सह विवाहमकरोत्। अत्र धनेन प्राप्तशक्तेः तस्य साहसविश्वासयोः वर्णनं वर्तते। इयं कथा विश्वम्भरस्यैकान्तिकप्रेम्णः रूपायणे क्षमा। विधवाविवाहेन समाजसंस्कारस्य भावनापि व्यज्यते। रुचिपूर्णेन वार्तालापेनैकं शोभनमारम्भं प्रापयन्ती 'श्वेतपद्म'[76] इति कथा वक्तृश्रोतृशैल्या पुरातनशैल्याः आभासं ददाति। पिता स्वपुत्रीं प्रति स्वव्यक्तिगतानुभवानि वर्णयन् नगरीयसभ्यतायाः तथा चाडम्बरयुक्तस्य स्थायिनः मिथ्यास्वरूपस्य च विवेचनं करोति। अत्र पित्रा आत्मानं नितान्तं निष्कपटग्रामीणयुवकरूपेण प्रस्तुवता इदं प्रदर्श्यते यदेकस्मिन् महानगरे सः स्वसहकर्मिणा छलितः वञ्चितश्च। श्वेतपद्मया स्वमिथ्यावार्तालापेन व्यवहारेण च सत्यवती इति व्यङ्ग्यं नाम प्राप्य तथाऽयोग्या सत्यपि सा येन-केन प्रकारेणोच्चपदं प्राप्नोति। किन्तु पदगतोत्तरदायित्वानां निर्वहणे सा असमर्था भवति। अतः स्ववाक्चातुर्येण मिथ्यास्नेहप्रदर्शनेन नैकेषां लेखानां संशोधनं तथा चान्यकार्याणि नवनियुक्तेन सरलहृदयेन सुरेशेन कारयति। सत्यावबोधनानन्तरं सुरेशः भविष्यत्काले तस्याः कार्याणि नाकरोत्। अस्याः कथायाः शिल्पम् अतिशिथिलं वर्तते।

'रेणुगृहम्'[77] इति कथा वस्तुदृष्ट्या शिल्पदृष्ट्या च शोभना वर्तते। इतिवृत्तात्मकेनारम्भेण सहेयं कथा शनैः शनैः विविधरूपाणि गृह्णती रुचिकरा संजाता। चरित्रप्रधान-मनोवैज्ञानिक-कथा 'धूलिधूमः'[78] पुरातनतायाः वस्तुगतायाः शिल्पगतायाश्च प्रतीतिं कारयति। अस्यां कथायां राधेश्यामबाबोः एकाकित्वस्यावकाशप्राप्त-जीवनस्य विमलायाश्च दुःखस्य कारणं कथान्ते ज्ञायते। वार्तायां संसारस्य दुःखपूर्णस्थित्याः दीर्घचर्चा वर्तते। तर्कविचाराणां मध्ये कथा विलुप्तप्राया भवति। एवं कथारसोऽपि बाधितो जातः। कथायाः मूलसूत्रमन्वेषणसाध्यं सञ्जायते। विमला स्वरुग्णपत्युः चिकित्सार्थं चिकित्सालये अस्ति। यत्र बाबुभाई इत्यस्य अपरिचितस्य अतिशायिन्याः दयाशीलतायाः मिथ्यापरोपकारितायाः जाले आबद्धा सती तया स्वसर्वस्वं विलुप्यते। तत्पश्चात् विमलायाः भाविपारिवारिकसमस्यासु, उत्तरदायित्वेषु समाजिकस्थितिषु च



विचारपरकाः संवादाः सन्ति। तत्संवादैः एव विमला स्वयमेवात्मना सह घटितायाः दुर्घटनायाः वर्णनं करोति। पण्डामहोदयस्य सर्वाणि पात्राणि प्रायेण मुखराणि भवन्ति। इयं कथा इतिवृत्तात्मिका वर्तते। अत्र वर्णनात्मिका शैली अस्ति। स्थाने स्थाने कथाकारस्य विचारात्मकोपस्थितिं कथारसप्रवाहं बाधते।

वार्तालापप्रधानकथायां 'भयभूतः'[79] इत्यस्यां स्वार्थपूर्णराजनीत्यां वर्तमानदुर्नीत्याञ्च कटुप्रहाराः, कटाक्षाश्च कृताः सन्ति। विमलानाम्न्याः कस्याश्चिद् युवत्याः व्यथायाः वर्णनात्मकं निरूपणं कुर्वत्यां 'दग्धचन्द्रिका' इत्यस्यां कथायां समाजस्य अनैतिक-तत्त्वानां छलपूर्णकार्यकलापेषु प्रकाशः निक्षिप्यते। कथारम्भे बलात्कारस्य बलीभूतायाः विमलायाः मानसिकसामाजिकोत्पीडनस्य विश्लेषणं, विमलायाः तस्याः सख्याः रमायाश्च दीर्घवार्तालापमाध्यमेन वर्ण्यते। अत्र कोलाहलं दीर्घकालं यावदस्ति। अत्र विचारेषु लेखकस्योपस्थित्याः, विषयविषमतायाः, कौतूहलस्य च अतिशयाभासः वर्तते।

'नष्टनक्षत्रम्'[80] इत्यस्यां कथायां कथानायकस्य मधुकरस्य दिवंगतायां पत्न्यां तस्य अन्तर्बाह्यमनोदशायाः चित्रणं कथायाः केन्द्रं वर्तते। मधुकरस्य जीवनस्य प्रत्यङ्गं तस्याः पत्न्याः स्मितायाः स्मृतयः समाहिताः सन्ति। कथायाः प्रत्येकं शब्दे वियोगिभावो मुखरीभूतः। 'महारण्यम्'[81] इति कथायां निबन्धात्मकशैल्यां संसारस्य वर्तमानसंघर्षान्तर्विरोधसमस्यासु रुचिपूर्णा चर्चा वर्तते। लेखकस्य दृष्टिकोणः प्रबलाशावादेन पोषितः। कथायां द्वयोः मित्रयोः वार्तालापेन ईश्वरीयन्यायविधानं प्रति निष्ठा व्यक्तीकृता। 'दायित्वम्'[82] इत्यस्यां कथायां अनादिकालात् मानवमनसि निवसन्तीषु कामनावासनाजिजीविषासु तार्किकं चिन्तनं वर्तते। प्रतिक्षणं परिवर्तनशीलस्य संसारस्य स्थितिषु विचारः प्रस्तुतः। एतैः विचारैः प्रभावितस्य मानवजीवनस्य दशाऽन्तदर्शानामत्र वर्णनं वर्तते। कथायां संस्कृतलेखकस्य, महाशिक्षकविवेचकस्वकर्मलीनस्य कर्मयोगिनः प्रियंवदस्य विचारदृष्ट्यां तस्य जीवनचर्या सांसारिकदशा च प्रकाशिता।

आसु कथासु कथानकस्य न्यूनत्वं विमर्शस्य आधिक्यं च वर्तते। अत्र सम-सामयिकं याथार्थ्यं वैचारिकस्तरे जागरितम्। एतासु कथासु भौतिकजगतः बाह्यपरिस्थितीनां चित्रणस्य स्थाने वैचारिकजगति तासामभिव्यक्तिः वर्तते।

**4. नारायणदाशः** (1970, गंजाम, ओडिशा) - नवोन्मेषिप्रतिभा-सम्पन्नः

डॉ. नारायणदाशः समकालीनसंस्कृतलघुकथासाहित्याकाशे उदीयमानं नक्षत्रमस्ति। तस्य कथासंग्रहः "गङ्गे च यमुने चैव" इतिशीर्षकेण प्रकाशितोऽस्ति। एतस्य नवकथाशिल्पस्य समकालिकसंस्कृतजगति प्रशस्यं स्थानं वर्तते। अस्मिन् संग्रहे भावकलापक्षयोः समानरूपेण आधुनिकता ध्वन्यते। तस्य कथासु समकालिक-मानवसमाजस्य आदर्शा यथार्थाः, कल्पना-भावनाः तथा च बुद्धिपरकविसङ्गतयः वैचारिकपृष्ठभूमौ अभिव्यज्यन्ते। सनातनीं भारतीयसंस्कृतिं प्रति लेखकस्य आस्था न केवलं संग्रहस्य शीर्षके समाहिता अपितु सर्वत्र द्योत्यते। आसां कथानां प्रमुखं वैशिष्ट्यं कुतूहलचमत्कारजीवनदर्शनवातावरणवर्णनादीनि सन्ति। अस्मिन् कथासंग्रहे वर्तमानसमयोचिताभ्यः नैकाभ्यः समस्याभ्यः लेखकेने भावपूर्णाः स्वराः प्रदत्ताः। संग्रहस्य प्रथमकथायां 'वाल्मीकिः'[83] इत्यस्यां जातिप्रथोत्पन्नाः विडम्बनाः चित्रिताः सन्ति। अत्र पारिवारिकमूल्यानां परिवर्तनशीलाधुनिकसामाजिकसन्दर्भेषु विश्लेषणं वर्तते। अत्र पात्राणां मानसिकसामाजिकसंघर्षः चित्रितोऽस्ति। अत्र जातिव्यवस्थासन्दर्भे समाजस्य परस्परविरोधपरां स्थितिं व्यक्तीकुर्वन् दाशमहोदयः कथयति-"तव पिता प्रायो वशिष्ठब्राह्मणः। अहं ब्राह्मणोऽपि वाल्मीकिः। अयोध्यायाः राजपुरोहितवशिष्ठस्य सम्मतिं विना राजधर्मरक्षणनाम्ना मर्यादापुरुषोत्तमः रामचन्द्रः यदि सीतायाः अग्निपरीक्षां कृत्वापि तां पतितामस्पृश्यामिति जुगुप्स्य निर्वास्य अरण्यं न प्रैरयिष्यत्, पुनः तां पतिपरित्यक्तां सीतां ब्राह्मणो वाल्मीकिः निजसंरक्षणं न आनेष्यत् तदा रामायणरचनं न समभविष्यत्। अस्माकं समाजे नैके ब्राह्मणाः, तेषु कोऽपि वशिष्ठः कश्च वाल्मीकिः।"

'चिन्नामायाः छुरिका'[84] इत्यस्यां कथायां स्नातकच्छात्रायाः चिन्नामायाः जीवनसंघर्षस्य मार्मिकं चित्रणं दृश्यते। एकस्य शिक्षामन्त्रिणः अन्धकामनायाः बलिभूतायाश्चिन्नामायाः प्रतिशोधाग्नौ भस्मीभूतं तस्या भविष्यमसह्यं दुःखञ्चाभिव्यज्यते। 'चाण्डालबालः'[85] इत्यस्यां कथायां पूर्वधारणानां भावविकाराणाञ्च वशीभूतानां पात्राणां मानसिकस्थितयः गतिविधयश्च रूपायिताः दृश्यन्ते। 'प्रादेशीयः'[86] इत्यस्यां कथायां लेखकेन समकालिकछात्रजीवनशैली चित्रिता। 'कर्णपुष्पम्'[87] इति कथा यौतुकप्रथाधारिताऽस्ति। 'श्रावणी'[88] इत्यस्यां कथायां पारिवारिकशोषणस्य बलिभूतायाः नायिकायाः व्यथायै मार्मिकस्वराः प्रदत्ताः। 'गतस्तु पुत्रो न समागतः'[89] इति कथा



जीवनस्य संवेदनशीलपक्षे पुत्रप्रेम्णि आधृता वर्तते। 'मानसी'[90] इत्यत्र प्रणयस्य गम्भीरता, शैल्यां प्रवाहः, संयोजने कुशलता सर्वत्र कुतूहलता च वर्तते। 'अकथा'[91] इत्यस्यां कथायां निम्नवर्गीयदाम्पत्यस्य मार्मिकांशाः विद्यन्ते। 'अभिशापः शतरूपायाः'[92] इत्यस्यां कथायां वैज्ञानिकप्रगतेः भयावहता चित्रिता वर्तते। 'ईप्सिता'[93] इत्यस्यां कथायां जीवनस्य क्षणभङ्गुरतायाः दार्शनिकाभिव्यक्तिः अस्ति। कविसन्ततिः[94], कविकन्या[95], कविप्रतिभा[96] चेत्यादिषु कथासु कविसमाजे परिव्याप्ताः विसङ्गतयः व्यथाः विडम्बनाश्च भावपूर्णशैल्या अभिव्यक्ताः सन्ति। कविसन्ततिः इत्यस्यां कथायां कवेः काव्यप्रेम्णः पुस्तकप्रेम्णश्च मार्मिकी व्यञ्जना अस्ति।

मूलम्,[97] गङ्गे च यमुने चैव,[98] सत्यं शिवं सुन्दरम्,[99] संस्कृतस्य कृते इदं शरीरम्[100] इत्यादिषु कथासु भारतीयसंस्कृतिं सभ्यतां, परम्परां च प्रति प्रेम-श्रद्धा-निष्ठाभिमानभावाश्च व्यञ्जिताः। तत्पत्रं सः प्रणयः[101] इत्यस्यां कथायामेकस्य प्रवासिनो भारतीयस्य मनसि स्वदेशप्रेम तथा भरतीयसंस्कृतिं प्रति तस्य समर्पणं च प्रदर्शितम्। "मूलम्" इत्यस्यां कथायां प्रवासिनां भारतीयानां स्वदेशप्रेम, स्वसंस्कृतिपालनं, स्वपरम्पराणां निर्वहणस्य तथा च स्वजन्मभूमौ निवासस्य उत्कटाभिलाषः वर्ण्यन्ते। पक्षान्तरे भारतीयेषु विदेशे निवासस्य लालसा अपरं च अधिकाधिकं धनार्जनस्य आकाङ्क्षा दृश्यते। गङ्गे च यमुने चैव इत्यस्यां कथायां देशं समाजं धर्मं प्रति उच्च-भावोद्बोधनमस्ति।

एवमासु कथासु सामाजिकसमस्याः पारिवारिकसम्बन्धान् भावनात्मक-द्वन्द्वांश्च प्रति काचिद् विश्लेषणात्मिका दृष्टिः निहितास्ति। इमाः कथाः भावगाम्भीर्येण, मार्मिकतया च पाठकान् प्रभावितान् कर्तुं समर्थाः सन्ति। अत्र भावसम्प्रेषणीयतायां सहायकानि वातावरणीयचित्राणि सन्ति। घटनावैचित्र्यस्य स्थाने अत्र भावनात्मकः विचारात्मकश्च विस्तारः प्रशस्यः वर्तते।

कथानकस्य प्रभावपूर्णा प्रस्तुतिः, विस्तृतघटनाक्रमस्य संक्षिप्तं कुशलञ्च संयोजनं लेखकस्य श्रेष्ठसाहित्यकर्मणः परिचायकमस्ति। आसु कथासु न केवलं व्यक्तिगतपारिवारिकसामाजिकसमस्यानां तथा च तासां समाधानस्य विश्लेषणं वर्तते अपितु तत्सम्बद्धानां सन्तुलिततत्त्वानां भावात्मिका विचारात्मिका च व्याख्याऽस्ति। आसु कथासु प्राणमयं सर्जनं निहितमस्ति। अत्र सहृदयगतभावात्मकपरिवर्तनानि

अभिलक्ष्यन्ते। कथाकारस्य यथार्थवादिनी दृष्टिः श्लाघनीया अस्ति। अस्यां दृष्ट्यां जीवनजगतोः सम्बन्धानां सर्वविधा ग्रहणशीलता समाहिता अस्ति। कथाकारेण यथार्थेन सह भावप्रसङ्गस्य महत्तानुकूलाः स्वसंवेदनाश्च अभिव्यक्ताः।

अत्र पात्राणां संघर्षक्षमता तथा च तेषां जिजीविषा विविधबिडम्बनात्मक-परिस्थितिमाध्यमैः दृश्यते। इमानि पात्राणि विपरीतपरिस्थितिषु संघर्षात्मककस्थितिभिः सञ्चरन्ति काश्चन सार्थकदिशाः प्राप्नुवन्ति। अत्र द्वन्द्वात्मक-संघर्षपूर्ण-स्थितीनां विश्लेषणानन्तरं भावात्मकविचारस्योपस्थितिः कथाभ्यः सुखात्मकमन्तं प्रददाति।

अस्मिन् संग्रहे यथार्थादर्शयोः, कल्पनावास्तविकतयोः समुचितं सन्तुलनं दृश्यते। अत्रत्यं समन्वितं कथासंयोजनं, घटनानां सहजं प्रस्तुतीकरणं, पात्राणामन्त-र्द्वन्द्वात्मकः संघर्षः, प्रवाहपूर्णा भाषाशैली, स्वाभाविकं परिवेशचित्रणं, सहजा मार्मिकी च भावाभिव्यक्तिः कथासंग्रहाय प्रशस्यं स्थानं प्रददति।

आधुनिकसमये संस्कृतकथासाहित्ये कथालेखकेषु नवकथाविधासु सर्जनाय विशेषग्रहो दृश्यते। संस्कृतेतरकथाविधाः संस्कृतभाषायामवतार्य कथासाहित्यस्य समृद्धेः प्रगतेश्च प्रशस्यः प्रयत्नः दृश्यते। डॉ. नारायणदाशस्य 'हत्याकारी कः' इति संग्रहोऽपि अस्यां दिशि कश्चन श्लाघ्यः प्रयत्नः वर्तते। दशाधिकाभिः रहस्यकथाभिः सुसज्जितः अयं संग्रहः संस्कृतभाषायां प्रकाशितः प्रथमः स्पशकथासंग्रहः वर्तते। अत्रत्यानां स्पशकथानां शीर्षकाणि इमानि सन्ति-'प्रतिरूपम्'[102], 'सत्यमेव जयते'[103], 'अपहर्ता कः'[104], 'हत्याकारी कः'[105], 'मरणस्य मूल्यम्'[106], 'छद्मवेशी'[107], 'हत्याकारिणी प्रेमिका'[108], 'हत्याकारिणः चिह्नम्'[109], 'पूर्वानुमानम्'[110], 'अपराधिनो दूरभाषः'[111] तथा 'चतुरचौराः'[112] चेति। आसां कथानां नूतना शैली, सहजा सरला प्रसन्ना च भाषा, कथावस्तुनः अभिनवा प्रस्तुतिः, उत्सुकता-विस्मयादि-योजना च संस्कृत-साहित्ये लेखकाय स्वागतयोग्यं स्थानं प्रयच्छन्ति। वस्तुतः स्पशकथा-गुप्तचरकथा-अपराधान्वेषणकथा-रहस्यकथासु औत्सुक्य-योजनायाः, विस्मय-योजनायाः तथा चाद्भुतरस-योजनायाश्च प्रयोगः अपेक्षितः मन्यते। आसां कथानामाधारभूता वस्तुयोजना तत्र आकर्षणस्य प्रमुखं केन्द्रं भवति। डॉ. दाशस्य कथासु आसां तत्त्वानां कुशलः प्रयोगो वर्तते। इतः पूर्वम् उशती, लोकभाषा, स्वरमङ्गला, भारती चेत्यादिषु पत्रिकासु अपि प्रकाशितं डॉ. दाशस्य नवसर्जनात्मकं कथासाहित्यं देववाणीं



संवर्धयति। लेखकस्य अन्यभाषीय-साहित्यस्य अवबोधः तथा संस्कृतभाषां प्रति स्नेहः तं नवविधासु सर्जनाय प्रोत्साहयति।

**5. प्रमोद कुमारनायकः** (1963, भद्रक, ओडिशा) - हास्यकथाविधायाः व्यङ्ग्यकथाविधायाः वा रचना संस्कृतसाहित्ये विरला एव दृष्टिगताः भवन्ति। समकालीनसंस्कृतसाहित्ये डॉ. प्रमोद कुमार नायकस्य द्वौ हास्यकथासंग्रहौ 'स्वर्गादपि गरीयसी', 'उवाच कण्डुकल्याणः' (1998) प्रकाशितौ आस्ताम्। 'उवाच कण्डुकल्याणः' हास्यरसेन प्राणान्वितानां एकविंशतेः कथानां संग्रहो वर्तते। अत्र परिवारस्य, राजनीतेः, भू-समाजस्य वा एतादृशानां पात्राणां प्रसङ्गानाञ्च उद्भावना वर्तते या हास्येन सह पाठकस्य मर्मणः साक्षात् स्पर्शने क्षमा प्रतीयते। केलिकदम्बकस्य इस्पातशिल्पम्,[113] क्रन्दति अनुनासिकः,[114] कादम्बिनीनिरोधिनी समितिः,[115] हास्ययोगाणकार्यक्रमः,[116] नेत्रीरूपेण संस्थिता,[117] डङ्कि-प्रस्तावः,[118] कीलकानन्दः[119] इत्यादयः कथाः हास्यरसेन पूर्णाः सन्ति अपि च परिवर्तनशील-सामाजिक-परम्परासु व्यङ्ग्यमपि कुर्वन्ति। 'शिक्षकसंग्रामसमितिः'[120] इत्यस्यां कथायां स्वक्षुद्रस्वार्थानां पूर्त्तये शिक्षको जलातङ्कमिश्रः संग्रामस्याह्वानं करोति। पूर्वकाले सः शिक्षणकार्ये गृहेऽपि छात्रान् पाठयित्वा धनार्जनं करोति स्म। अयमेव शिक्षकमहाभागः प्रौढावस्थैव संग्रामाय सर्वोपयुक्ताऽवस्थेति कथयति। नैकेषां सदस्यानां सहयोगेन कस्याश्चित् समित्याः घटनेन सर्वकारेण सह संग्रामं करोति। पञ्चवर्षानन्तरमपि किमपि निवेदनं सर्वकारः न स्वीकृतवान्। सभाशुल्करूपेण दीयमानेषु सदस्येषु असन्तोषः व्याप्तः। अधुना जलातङ्कमिश्रः तान् अनशनाय प्रेरयति। सचिवालयसम्मुखे त्रीन् सप्ताहान् यावत् आमरणानशने निरतानां शिक्षकाणां धैर्यं समाप्तं भवति। तदैव जलातङ्कमिश्रः तान् बोधयति यत् सर्वकारेण अस्माकं हठाग्रहपत्रं स्वीकृतम्। आनन्दमग्नाः सर्वे तस्य जयोद्घोषं कुर्वन्ति। किन्तु षण्मासानन्तरमपि न किमपि निवेदनं परिपूर्णं सर्वकारेण। व्यथिताः शिक्षकाः पुनर्विचारनिमित्तं जलातङ्कस्य गृहे सम्मिलिताः। तत्र जलातङ्कः तेषां हस्तेषु मिष्टकं प्रदाय कथयति यस्य पुत्रेण प्रथममासवेतनं लब्धम् यत् कार्यं पूर्वसर्वकारेण न कृतं तत् कार्यं (उद्योगायानुमतिः) वर्त्तमानः मुख्यमन्त्री पूरयति, उद्योगं दत्त्वा च अनुगृह्णाति। सः एतत् समग्रस्य शिक्षकसमाजस्य कृते गौरवमिव उद्घोषयति। एवमातङ्कमिश्रः शिक्षकान्दोलनस्य

नेता भूत्वा ख्यातिमर्जितवान्। तथा चेदमान्दोलनं प्रशमयितुं नेतृप्रमुखं सन्तुष्टं कुर्वन् सर्वकारः तस्य पुत्राय उद्योगमददात्। शिक्षकनेतृसर्वकारयोः स्वार्थपरकसम्बन्धेषु प्रस्तुतानि तीक्ष्णव्यङ्ग्यानि अत्र प्रभावमुत्पादयन्ति।

वनभांषा,[121] साक्षात्कारः[122], पशुपालनम्,[123] प्रतियोगिता,[124] लोकलीला,[125] पुनर्नवीकरणम्,[126] नाटकम्,[127] मिलितमन्त्रिमण्डलम्,[128] अथ च कृषकः,[129] कीलकानन्दः[130], बजेट्,[131] दुर्दशा देवगुरोः[132], बाए डाडि वाए[133] चेत्यादयः नवविंशतिः कथाः हास्येन सह तीव्रव्यङ्ग्यस्य तीक्ष्णप्रहारान् कुर्वन्ति। आसां कथानां प्रत्येकं वाक्यं व्यङ्ग्येन संपोषितं वर्तते। पात्राणां, स्थलानां नामसु, परिस्थितीनां, घटनानां संयोजनानाञ्च सर्वत्र व्यङ्ग्य-शैल्याः दर्शनं भवति। यथा-''जीवनस्य अन्तिमपश्चिमवयसि यमस्तुतिपाठनिरतस्य कामिनीरङ्कस्य अङ्के सहसा उद्भासितं नवीनं यौवनं कण्डुसर्वस्वस्य वचसा।'[134]

'स्वर्गादपि गरीयसी' इतस्मिन् कथासंग्रहे, यमबहुपतिकासंवादः, साक्षात्कारः, स्वर्गादपि गरीयसी, आमन्त्रणं, निमित्तमात्रम्, परीक्षा चेत्यादिभाषाप्रसङ्गे सेवकः इत्यादिषु सर्वासु कथासु चतुर्दिक्षु व्याप्तासु समस्यासु सूक्ष्मदृष्ट्या प्रकाशः निक्षेप्यते। यत्र तत्र समस्यानां समाधानमपि प्रस्तुतम्। सर्वाः कथाः कथ्य-भाव-शैली-भाषा-कथोपकन-परिवेशादिदृष्ट्या श्रेष्ठयथार्थपरिस्थितीः सर्जयन्त्यः व्यङ्ग्यपरकशैल्यां रचिताः। एतासां कथानां सर्वाधिकं वैशिष्ट्यं पात्रेषु समाहितं वर्तते। इमानि पात्राणि समाजस्य भिन्न-भिन्न-वर्गाणां प्रतिनिधित्वं कुर्वन्ति। 'यमबहुपतिकासंवादः'[135] इति कथायाः 'बहुपतिका' अत्याधुनिकानां स्वार्थपरायणानां भोगविलासरतानां नारीणां प्रतिनिधित्वं करोति। 'स्वर्गादपि गरीयसी'[136] इति कथायाः नरकाचार्यः भारतीयानां विदेशगमनमोहस्य, तेषां स्वार्थपूर्णस्वभावस्य भ्रष्टाचारस्य, अवसरवादादीनाञ्च प्रवृत्तीनां प्रतिनिधित्वं करोति। 'आमन्त्रणम्'[137] इति कथायां सर्वगिलः तथा च मर्कटरदना च विवाहादिषु उत्सवेषु उपहारादानप्रदानशीलस्य समाजस्य संकीर्णान् स्वार्थपरान् जनान् प्रति सङ्केतं कुरुतः। 'निमित्तमात्रम्'[138] इति कथायाः मुख्यपात्रं सिद्धमठाधीशः धर्माडम्बरपाखण्डपूर्णामन्त्रणदातॄणामाचरणशीलस्य धार्मिकवर्गस्य प्रतिनिधित्वं करोति। 'आदिभाषाप्रसङ्गे'[139] इति कथायां 'प्रोफेसर-महोदयः संस्कृतविदुषां संस्कृतविमोहस्य आंग्लभाषामोहस्य च दृष्टिकोणं व्यक्तीकरोति। 'सेवकः'[140] इति



कथायां वर्तमानसमाजे गृहसेवकानां भ्रष्टाचारः, लोभः, स्वार्थश्च रूपायितः। कथासु अत्याधुनिकजीवनशैलीषु व्यङ्ग्यानि प्रस्तुतानि। 'यम-बहुपतिकासंवाद' इति कथायां निर्जनवनमार्गे मृतः वानरमुखः वर्तते। अपरं चात्र 'बहुपतिका' 'यम' इत्यनयोः मध्ये वार्तालापः प्रवर्तते। किन्तु प्रस्तुते वार्तालापे महानगरीयात्याधुनिकजीवनशैल्यां व्यङ्ग्यं दृष्टिगतं भवति। 'साक्षात्कारः'[141] इति कथायां शिक्षादिसंस्कारदातृविभागे भ्रष्टाचारं दर्शयित्वा भ्रष्टाचारसमाजे व्याप्ता गम्भीरमूला समस्या रूपायितास्ति। 'स्वर्गादपि गरीयसीत्यस्यां' प्रदेशीयसंस्कृतिः परिवेशः च साकारः अभवत्। 'निमित्तमात्रम्' इति कथां विहाय शेषकथाः नगरीय-जीवनशैल्यां व्यङ्ग्यं प्रस्तुवन्ति। अपि च आधुनिकपरिवेशं स्पष्टं कुर्वन्ति। 'निमित्तमात्रम्'[142] इति कथायां ग्रामीणवातावरण सर्जनेन सह धार्मिकभ्रष्टाचारस्योपरि व्यङ्ग्यं प्रस्तुतं वर्तते।

साहित्यं समाजस्यैतादृशं प्रपत्रमस्ति यस्मिन् समाजस्य यथार्थप्रतिबिम्बाः चित्रिताः भवन्ति। 'कथासप्ततिः' (2003) इति कथासंग्रहे समाजस्य बहुवर्णानि विविधचित्राणि प्रतिबिम्बितानि, यानि संस्कृतलघुकथासाहित्यस्य समृद्धिं सूचयन्ति। इमाः कथाः विद्युत्प्रकाशेन सह अस्माकं सामाजिकमानसिकभावनात्मकपरिवेशान् उद्घाटयन्ति। संक्षिप्तकलेवरेष्वपि स्वप्रतिपाद्यस्य प्रकाशने समर्थाः इमाः कथाः प्रायेण एकस्यैव पात्रस्य माध्यमेन कथाकारस्य लक्ष्याणां पूर्त्तये सहायिकाः सन्ति। एतासु कथास्वस्माकं परिवेशस्यैवानेकान्युन्मेषकारकाणि तथ्यानि अस्मान् विचारसम्पन्नान् कृत्वा चमत्काराणि सृजन्ति। इमाः कथाः चिरकालिकरूढीनां परम्पराणां वा अकस्मात् परिहारेण, अग्रहणीयस्य ग्रहणेन, ग्रहणीयस्य च तिरस्कारेण, संस्कृत्यां परिवर्तनेन सह विचारगतकर्मगतविद्रोहं प्रगतिं तथा च तदुत्पन्नस्य प्रभावस्य पक्षं विपक्षं चास्माकं समक्षमुद्घाटयन्ति। एवमेताः कथाः पाठकानां प्रबोधनाय मार्गदर्शनाय च समर्थाः सन्ति। पात्राणां मनोभावेषु तर्कपूर्णपरिवर्तनस्य चित्रणं कुर्वत्य इमाः कथाः नवीनसंकल्पैः विचारैश्च पाठकस्य विचारसमृद्ध्यां वृद्धिं कुर्वन्ति। मनोवैज्ञानिक-विश्लेषणस्य भावोन्मेषैश्च पाठकस्य भावगतस्य नवीननक्षत्राणि प्रकाशयन्ति। अत्र प्रशासनिकभ्रष्टाचाराय तर्कपूर्णशैल्या प्रभावशालिन्यभिव्यक्तिः प्रदत्तास्ति। राजनीति-शिक्षा-चिकित्सादिक्षेत्रेषु भ्रष्टाचारः नेता,[143] चौरः,[144] निरपेक्षः[145] गुरुः, महाकविः[146] इत्यादयः नैकासां कथानां विषयाः सन्ति। समसामयिक-राजनीत्यां लेखकस्य

सूक्ष्मदृष्टिः वर्तते। ग्रामसभानां, पञ्चायतान्नां, मन्त्रिनेतृराजनीतिज्ञानामाडम्बरयुतस्य पाखण्डपूर्णाचरणस्य आसु कथासु प्रभाव्यङ्कनं वर्तते। सहैव एतादृशानि आचरणानि एतासु कथासु पुरस्कृतानि सम्मानितानि च प्रदर्श्यन्ते। 'नेता'[148], 'सेवा'[149], 'उपादानम्',[150] ग्राममुख्यः[151], ग्रामसभा[152] चेत्यादयः एतादृश्यः कथाः सन्ति। प्राशासनिकतन्त्रे 'शिक्षाक्षेत्रे च व्याप्तेभ्यः भ्रष्टाचारेभ्यः पारिवारिक-सामाजिक-मानवीय-मूल्यानां तीव्रह्रासेभ्यश्च समर्थस्वरं ददत्यः 'निरपेक्षः',[153] राजनापितः,[154] साधुः,[155] स्वाधीनतादिवसः,[156] आदर्शशिक्षकः,[157] शिक्षा,[158] अधिकारः,[159] परित्यक्ता,[160] अन्तिमः सुयोगः[161] चेत्यादयः कथाः यथार्थस्य प्रकाशे रचिताः सन्ति। मानवीयमूल्यानां पराकाष्ठा अप्यत्र सन्ति। यथा - जननी,[162] मातृत्वम्,[163] संख्या,[164] इत्यादयः कथाः। क्रीडाप्रेम,[165] आदर्शचिकित्सा,[166] हरिकीर्तनम्,[167] माधवसेवा,[168] कविः,[169] महाकविश्चेत्यादिषु[170] अनेककथासु चिकित्साविभागस्य भ्रष्टाचारस्य, धर्माडम्बरस्य तथा च साहित्यस्य साहित्यकाराणाञ्च दुर्दशाः चित्रिताः सन्ति।

भावभाषाशैल्यां परिवर्तनं, प्राचीनमान्यताभिः सह विद्रोहः शास्त्रीयसीमोल्लङ्घनादीनि प्रति नवीनसाहित्यकाराणामत्यधिक आग्रहो दृश्यते। आसु कथासु नवयुगीन-परिवर्तनशीलानां परिस्थितीनामङ्कनं वर्तते। अत्र एकस्य वर्गस्य कालस्य वा व्यावहारिकस्थित्याः चित्रणं वर्तते। समकालिकीनां संघर्षान्तर्विरोधदुर्बलतानां, ध्वंसमानानामादर्शानां पतनोन्मुखिनां नैतिकमूल्यानां प्रतिबिम्बनं वर्तते। इमाः कथाः वर्तमानजीवनस्य प्रतीकमिव प्रतीयन्ते। अस्य संग्रहस्य लघुकथाक्षेत्रे अप्रतिमं योगदानं वर्तते।

**स्व. अच्युतानन्दाशः -** (1959) बालेश्वरजनपदे लब्धजन्मनां कथाकाराणां स्वर्गतानाम् अच्युतानन्ददाशमहोदयानां षट्कथात्मकः सङ्ग्रहः अच्युतानन्दकथासाहित्यम् 2011 तमे वर्षे नवदेहलीस्थया संस्कृतभारत्या प्रकाशितः। एतस्य संग्रहस्य सम्पादको वर्तते डॉ. नारायणदाशः। अयञ्च कथासंग्रहः षट्कथाभिरलङ्कृतः सन् लोकलोचनमागतः। अत्र द्वे लघुकथे, द्वे टुप्कथे, एका पुनरुक्ता लोककथा, एका च अनूदिता कथा मूलरूपेण टल्स्टयवर्येण विलिखिता च प्राकाश्यं गताः। वस्तुतः एतयोः लघुकथयोरपि किमपि वैशिष्ट्यमस्ति। उभे अपि कथे पशून् अधिकृत्य



लिखिते, यद्यपि अनुघटकत्वेनात्र मनुष्यस्यापि भूमिका वर्तते। उभयोरपि कथयोः कथनशैली अपूर्वा। शुकसंविद् इति कथायां प्रवृत्तो वार्तालापः मनोहरः। भाषा नातिसरला नातिजिटला वा, अतः मनोहरा च। कथायां चरित्राणां नामानि स्थानानि च साम्प्रतिकसमाजस्य प्रातिनिध्यं वहन्ति। एवमेव मा गामनागाम् इति कथायां काचिद् गौः आत्मकथां श्रावयति। अत्र द्वे टुप्कथे संगृहीते स्तः - कपालपाणिः तथा शीर्णं पाटलदलञ्च। कपालपाणिः उपपञ्चदशवाक्यैः निबद्धा कथा यत्र सर्वविधान् उपाधीन् समधिगतः परिणीतः कश्चन कन्यापिता प्रकाशयति आत्मनो नैराश्यम्। शीर्णं पाटलदलम्- इतीयं कथापि आकृत्या लघ्वी एव। काचन प्रोषितभर्तृका पत्युः प्रत्यावर्तनं प्रतीक्षते रेलस्थाने स्वपुत्र्या सह। पुत्र्यास्तु स्वविद्यालये किमपि अनुष्ठानं वर्तते। सा तदर्थं प्रतीक्षते। किन्तु सा जानाति स्म मातुः हृद्गतां व्यथाम्। साम्प्रतिके काले सामयिकमोहगतानां पतितानां यूनां युवतीनां च प्रेमाकर्षणेन अपरिणामदर्शि यदाचरणं तस्य कुफलं च सुष्ठु वर्णितं कथायामतीव मर्मस्पर्शितया। एवमेवात्रत्या पुनरुक्ता लोककथा उल्लेखयोग्या। इयं च लोककथा मङ्गोलियादेशीया। मङ्गोलियादेशे सप्तर्षिमण्डलस्योत्पत्तिमाश्रित्य या कथा प्रचलति तस्याः कथायाः संस्कृते पुनरुक्तेयं लोककथा। अस्यां कथायां मङ्गोलियादेशस्य संस्कृतिः सम्यक् प्रतिपादिता वर्तते कथाकारेण। अत्रत्याः कथाः प्रायः कथासरित्पत्रिकायां प्रकाशिताः आसन्।

**पराम्बा श्रीयोगमाया** (1969, नयागड ओडिशा) - पूर्वं विविधपत्रपत्रिकासु पराम्बायाः याः कथाः प्रकाशिताः आसन् ताः पुनः 'सम्पर्कः' इति शीर्षकेण संग्रहकारेण प्रकाशिताः अभवन्। सम्पर्के संगृहीताः दश कथाः एवं विधाः सन्ति- भाग्यबलमुत निष्ठाबलम्, प्रतीक्षा, पराभूतायाः जिजीविषा, शृक्ता नारी, संशयः, रुद्धद्वारम्, पाप-पुण्य-मीमांसा, प्रणयोपकथा, धूमाभा जीविका, सम्पर्को नामहीनश्चेति। सांसारिकसम्बन्धेषु दुःखं दृष्ट्वा लेखिकया एताः कथाः लिखिताः इति सा आमुखे स्पष्टीकरोति। अत्रत्याः प्रायेण सर्वाः कथाः लघुकथापर्याययुक्ताः। संशयः तथा च शक्ता नारी इति कथाद्वयं वस्तुतः पुटकथा (टुप्-कथा अथवा अतिलघुकथा) - श्रेण्यां स्थापयितुं शक्यते। समाजे नारीमनसो व्यथां संशयं वा अधिकृत्य एते द्वे कथे विरचिते स्तः। पापपुण्यमीमांसा इति कथा गोविन्ददाशविरचितस्य ओडिआ-उपन्यासस्य अमावस्या चन्द्र इत्यस्य पृष्ठभूमेरनुकरणमस्ति। अत्र स्मर्तव्यमस्ति यत् लेखिकया

पराम्बया एतस्य ओडिआ-उपन्यासस्य संस्कृते अनुवादः कृतः, स च संस्कृतभारत्या प्रकाशितः। सम्पर्को नाम काचिदासक्तिरिति लेखिकया प्रतिपादितम्। सा च आसक्तिः वस्तुगता, समाजगतां, जनगता, मनोगता, लेखकगता वा भवितुमर्हति। आसक्तेः एकः पक्षः सुखं भवति चेदपरः दुःखमपि भवति। वस्तुतः आरोपितं सुखं चिराय न भवति। अतः सम्पर्कः नाम दुःखमिति सार्थकतां भजति संग्रहस्य शीर्षकम्।

अस्मिंश्च कथासंग्रहे नारीसमस्या तथा नारीमनोविज्ञानं च चित्रितम्। भाग्यबलमुत निष्ठाबलम् इत्येतस्यां प्रथमकथायां नायिका सुचित्रा यद्यपि स्वपत्युः विश्वेशस्य एकवर्षानन्तरमपि विदेशात् प्रत्यावर्तने विलम्बे सति चिन्ताग्रस्ता भवति किन्तु सा एतद्विषये स्वश्वश्रूमपि स्वचिन्ताविषयं न सूचयति, यतो हि वृद्धा सा दुःखिता भविष्यतीति। अत्र नारी वज्रादपि कठोरा शिरीषकुसुमादपि कोमला च भवति इति लेखिकया दर्शितम्। संग्रहस्य प्रतीक्षा इत्यस्यां द्वितीयकथायां नायिका वारं वारं सर्वत्र च पुरुषाणां कामदृष्टेः शरव्या भवति। कार्यालये अधिकारिणः तथा गृहप्रत्यावर्तनसमये रेलयाने असामाजिकतत्त्वानाञ्च। पराभूताया जिजीविषा इत्यस्यां तृतीयकथायामपि एकस्या महिलाया व्यथाकथा चित्रिता। अत्र कस्यचित् अमेलविवाहस्य चित्रणं पाठकानां ध्यानमाकर्षति। शक्ता नारी इत्यस्यां चतुर्थकथायां कथानायिका सुजाता स्वगृहे श्वश्र्वा उत्पीडिता भवति। संशयः इत्यस्यां पञ्चमकथायां कथानायिकायां पद्मायाः प्रेम्णि सत्यपि नायकेन आदित्येन सह गृहजनानां विरोधवशात् विवाहो न भवति। रुद्धद्वारम् इत्यस्यां षष्ठकथायामपि काचन नारीसमस्या उत्थापिता। अद्यत्वे विवाहिताः पुरुषाः अपि आत्मानं योग्यमुद्घोष्य अविवाहिताभिः युवतिभिः सह निःशङ्कं विवाहं रचयन्ति। एकस्मिन्नेव नगरे एकाधिकं भवनं भाटकेन स्वीकृत्य एकाधिकाः पत्नीः च ते स्वीकृत्य निष्ठन्ति। पापपुण्यमीमांसा इत्यस्यां सप्तमकथायां यद्यपि काचिद् ऐतिहासिकी घटना चित्रिता तथापि नारीसमस्या एव कथायाः केन्द्रबिन्दौ वर्तते। प्रणयोपकथा इत्यस्याम् अष्टमकथायामपि एका विवाहसम्बद्धा अन्या नारीसमस्या चित्रिता वर्तते। धूमाभा जीविका इत्यस्यां नवमकथायाम् एकस्याः रूपजीविन्याः समस्या चित्रिता या वेश्या सत्यपि मातृत्वाधिकारिणी भवति तथा च स्वयमेव सन्ततेः दायित्वं निर्वहति। सम्पर्को नामहीनः इत्यस्यां दशमकथायामपि नारीसमस्या एव प्रस्तुता। युगीनपरिवर्तनकारणात् अन्तर्जालमप्यद्यत्वे सम्पर्कमाध्यमं



जायमानमस्ति। विवाहसम्पर्कोऽपि अस्यापवादो नास्ति।

**अरुणरञ्जनमिश्रः** (1959, नयागड, ओडिशा) - अरुणरञ्जनमिश्रः साम्प्रतमुत्कलीयकथाकाररूपेण अस्मासु प्रसिद्धः। यद्यपि न कश्चन संस्कृत-कथासंग्रहः अस्य लेखकस्य न प्रकाशितः किन्तु तस्य नैकाः संस्कृतकथाः पत्रपत्रिकासु प्रकाशिताः अभवन्। तस्य पुटककारस्य पुत्रः इति कथा इदम्प्रथमतया अस्मत्सम्पादनायां प्रकाशितायाम् उशती (अंक - 6, 2002) पत्रिकायां प्रकाशिता प्रशंसिता च। कथासरित्-पत्रिकायामपि तस्य काश्चन कथाः प्रकाशिताः। अरुणरञ्जन-मिश्रस्य ओडिआ-कथासंग्रहस्य 'जन्मान्धर स्वप्न' इत्यस्य अनुवादः मया संस्कृते कृतः।

**सम्पदानन्दमिश्रः** (1971, याजपुर, ओडिशा) - उत्कलीयः अपि सम्पदानन्दमिश्रः इदानीं पण्डिचेरीवास्तव्यः। सः संस्कृतजगति बालकथाकाररूपेण, हास्यकथाकाररूपेण वा प्रसिद्धः। तस्य काश्चन कथाः संस्कृतपत्रपत्रिकासु प्रकाशिताः। कृपणदम्पती, कविसम्मेलनम् तथा वक्तारस्तत्र दुर्लभाः इति तस्य तिस्रः कथाः उशती-(अंकः-6, 2002)-पत्रिकायाः गद्यविशेषाङ्के प्रकाशिताः सन्ति। उल्लेखनीयं वर्तते यत् सम्पदानन्दमिश्रस्य हास्य-कथासंग्रहः हास्यमञ्जरीति नाम्ना प्रकाशितो वतते।

पत्रपत्रिकासु प्रकाशिताः उत्कलीय-कथाकाराणां संस्कृतकथाः - न केवलं संग्रहाकारेण किन्तु दूर्वा-सम्भाषणसन्देश-संस्कृतप्रतिभा - संस्कृतमञ्जरी-भारती - अमृतभाषा-उशती-कथासरित्-प्रभृतिषु विविध-पत्र-पत्रिकासु उत्कलीय-कथाकाराणां कथाः प्रकाशिताः अभवन् भवन्ति च। तत्र पुनः विशिष्य कथासरित् इत्यस्याः विशुद्ध-संस्कृत-कथा-पत्रिकायाः अद्यावधि प्रकाशितानां सप्तदशानाम् अङ्कानामवदान-मुल्लेखयोग्यम्। अस्याः पत्रिकायाः षोडशतरङ्गे (आश्वयुज-फाल्गुन/ अक्टूबर-मार्च 2013) नैकेषामुत्कलीय-संस्कृत-कथाकाराणां प्रायः त्रिंशत्कथाः प्रकाशिताः वर्तन्ते। विस्तारभयात् केवलमत्र तासां कथानां नामोल्लेखपूर्वकं चर्चा क्रियते। अस्मिन्नङ्के स्मृतिपटलात् इति स्तम्भे द्वे कथे प्रकाशिते स्तः - कपालपाणिः (पृ.29) अच्युतानन्द दाशस्य (20.05.1960 - 05.06.2009, बालेश्वरम्) तथा च घृततण्डुलः (पृ.30) केशवचन्द्रदाशस्य (06.03.1955 याजपुरम्)। एवमेव दीर्घकथाः

इत्यस्मिन् स्तम्भे षट् कथाः प्रकाशिताः सन्ति। ताश्च यथा - ग्रामस्य नाम घटग्रामः (पृ.31) अरुणरञ्जन मिश्रस्य (02.01.1959, खोर्धा), अद्भुतः भूतः (पृ.41) बनमाली बिश्वालस्य (04.05.1961 याजपुरम्), अतिक्रमणम् (पृ.53) गोपबन्धु मिश्रस्य (13.10.1959 विरुडा, नयागढ़), अन्नं वै ब्रह्म (पृ.60) भागीरथी नन्दस्य (13.04.1966 मरुआ, केन्दुझरः), मार्कटिकः (पृ.66) नारायणदाशस्य (25.06.1972 चढियापल्ली, पुरुषोत्तमपुरम्, गञ्जामम्), गुगुलसेवा (पृ.71) गिरिधारी पण्डामहोदयस्य च (18.02.1977 भद्रकः) च। कथास्तम्भे अपि षट् कथाः प्रकाशिताः सन्ति। ताश्च यथा - अपत्यम् (पृ.78) रमाकान्त मिश्रस्य (पुरी), बन्धनम् (पृ.84) पूर्णचन्द्र अपाध्यायस्य (तलङ्गाशासनम्, भद्रकः), राजनीतिः (पृ.89) रवीन्द्र कुमारपण्डा-महोदयस्य (10.01.1963 याजपुरम्), मायारसालः (पृ.94) धर्मेन्द्र कुमारसिंह देवस्य (22.11.1971-बालिआपाटि, बालेश्वरम्), धूमवितानम् (पृ.97) प्रफुल्लकुमारिमिश्रस्य (20.02.54 पुरी, ओडशा), दूरात् सुदूरे (पृ.100) बुद्धेश्वर षडङ्गिनः (27.05.1968), वणाइगड, सुन्दरगड) च। एवमेव लघुकथास्तम्भे तिस्रः कथाः प्रकाशिताः सन्ति - मातृहीना (पृ.103), चायचषके... (पृ.106) च पराम्बा श्रीयोगमायायाः (19.09.1979 भापुरम् नयागढ) तथा रहस्यमयं सङ्गीतम् (पृ.107) सम्पदानन्द मिश्रस्य (17.09.1971 बालिगुडा, याजपुरम् ) चेति। व्यङ्ग्यकथास्तम्भे भाषासाहित्योत्सवे (पृ.110) प्रमोदकुमारनायकस्य (27.04.1965, पुरी) तथा शिक्षाप्रदकथास्तम्भे च पञ्च कथाः प्रकाशिताः सन्ति - नीलोपनेत्रम् (पृ.114) खगेन्द्र पात्रस्य (04.02.1953, बालाशोर), अद्वितीया (पृ.119) राधिकारञ्जनदासस्य (15.07.1959 - कटक), परोपकारः (पृ.122) हीरालालदाशस्य (06.07.1979), विधेर्विधानं विचित्रम् (पृ.125) मनोरञ्जनसेनापतेः (20.07.1965 - केन्द्रापडा) तथा च वनभोजः (पृ.113) रणजित बेहरामहोदयस्य (01.07.1976-बालिपोषि, हिन्दोलरोड, ढेङ्कानाल) चेति। एवमेव अनूदितकथास्तम्भे नाम्नः खेला (पृ.133) मूलम् रवीन्द्रनाथठाकुरस्य/अनु.नारायणदाशस्य, हारिता च सा कथा (पृ.137) तथा मृत्तिका महाकन्या (पृ.139) मूलम् अरुणरञ्जन मिश्रस्य / अनु. बनमाली बिश्वालस्य पुनरुक्ता पञ्चतन्त्रीया कथा ब्राह्मणस्य तथा धूर्तत्रयस्य कथा (पृ.141)



मूलम् - कैलासपट्टनायकस्य / अनु.-सदानन्द दासस्य (12.06.1969, तुलसीपुरम् , बाडकी कटकम् ) चेति। अन्ते च ललित-निबन्धः इत्यस्मिन् स्तम्भे चन्द्रकान्त-पण्डा-महोदयस्य (02.03.1976 धुसुरी, भद्रकः) सुप्रभातम् (पृ.148) इति ललितनिबन्धः प्रकाशितो वर्तते।

अस्मत्सम्पादनायां प्रयागात् प्रकाशितायाः उशती-पत्रिकाया पञ्चम-षष्ठाङ्कयोः (2001-2002) उत्कलीयकथाकाराणां नैकाः कथाः प्रकाशिताः सन्ति। तत्र च अरुणरञ्जनमिश्रस्य पुटककारस्य पुत्रः, सम्पदानन्दमिश्रस्य कृपणदम्पती, कविसम्मेलनम् तथा वक्तारस्तत्र दुर्लभाः, दिवाकरषडङ्गिनः कथा मूषिकः प्रत्यागतः, कुमारचन्द्रमिश्रस्य कथा तपस्या तथा बनमाली-बिश्वालस्य उन्मुक्तद्वारस्य पराहतश्चित्कारः अस्याः पत्रिकायाः गद्यविशेषाङ्के (अकः-6, 2002) प्रकाशिताः।

उपसंहारः - अतिशय-विषमताग्रस्तः साम्प्रतिकः समाजः एव पृष्ठभूमिः साम्प्रतिककथासाहित्यस्य। न केवलं राजकीयजीवनगाथा किन्तु उपेक्षितानामात्मकथा-प्यद्य कथासु वर्णिता भवति। अद्यतनकथानां नायकः समाजस्य उपेक्षितः प्रतारितः, प्रपीडितश्च कश्चित् सामान्य एव मनुष्यः यस्य सामान्यं चरित्रम् आत्मसात्कृत्य आधुनिक-कथाकारः स्वकथाः रचयति। साम्प्रतिककथासु प्रायः चिरपरिचिताः प्रवृत्तयो दृश्यन्ते चमत्कारकैः परिवर्तनैः सह। भावभाषाशैलीषु परिवर्तनं, प्राचीन-मान्यताभिः सह विद्रोहः, शास्त्रीय-सीमोल्लङ्घनादीनि प्रति नवीन-संस्कृतसाहित्य-काराणामत्यधिक आग्रहो दृश्यते। साम्प्रतिकासु कथास्वपि नवयुगीनपरिवर्तनशीलानां परिस्थितीनामङ्कनं वर्तते। अत्र समकालिकानां संघर्षान्तर्विरोधदुर्बलतानां, ध्वंसगतादर्शान् प्रति पतनोन्मुखानां नैतिकमूल्यानां च प्रतिबिम्बनं वर्तते। इमाः आधुनिक्यः संस्कृत-कथाः वर्तमानवजीवनस्य प्रतिबिम्बनमिव प्रतीयन्ते। एवमद्यतनकथाकाराणां वर्णनकौशलं सम्मोहयति पाठकान्। आधुनिकसंस्कृतकथासाहित्यम् अत्याधुनिकरचनाविधापेक्षया गुणपरिमाणेत्युभयदृष्ट्या अधिकं समृद्धतरं दृश्यते-कथाः (दीर्घकथाः), लघुकथाः, टुप्कथाः, स्पशकथाः, कान्तारकथाः व्यङ्ग्यहास्यकथाः चेत्येते समे कथाभेदाः नवीनालङ्करणैः कथासाहित्यं समृद्धं कुर्वन्ति। वस्तुतः संस्कृतकथासाहित्ये उपर्युक्तासु सर्वासु विधासु उत्कलीयकथाकाराणां योगदानं किञ्चिदधिकमेवेति यदि कथ्यते तर्हि न काचिदतिशयोक्तिः।

आधुनिकसंस्कृतकथासु प्रादेशिकभाषानिष्ठपदानाम् प्राबल्यं वर्तते। हिन्दी-ओडिआ-बंगला-मराठ्यादिपदानां प्रयोगात् कथाकारो मुक्तो भवितुं नार्हति। अपरस्मिन् पक्षे व्यावहारिकभाषाप्रयोगः कथाकारस्य दायित्वं विवशता च वर्तते। स्वस्वकथासु तत्तत्कथाकारैः प्रयुक्तं भाषावैविध्यं स्वीकर्तव्यं भवति। स्पष्टताविश्लेषणात्मकता-तर्कप्रवणतायाथातथ्यादिगुणैः युक्ता साम्प्रतिकी कथाभाषा सूक्ति-लोकोक्ति-बिम्ब-प्रतीकादिमाध्यमेन स्वलघुकलेवरेषु समधिकतया प्रभावोत्पादिका तथा सम्प्रेषणीया भवतीति अपरं वैशिष्ट्यमद्यतनीयकथालेखनप्रवृत्तेः। प्रान्ताधारेण संस्कृतकथानामध्ययनेन एतस्याः भाषाप्रयोगप्रवृत्तेः स्पष्टोवबोधः सम्भवतीति दिक्।

## सन्दर्भाः

1. दिशाविदिशा, डा.केशवचन्द्रदाशः

2-12. तत्रैव

13-27. ऊर्मिचूडा, डा. केशवचन्द्रदाशः

28-31. शून्यनाभिः, डां. केशवचन्द्रदाशः

32-41. निम्नपृथिवी, डा. केशवचन्द्रदाशः

42-51. एकदा, डा. केशवचन्द्रदाशः

52-53. नीरवस्वनः, डा. बनमाली बिश्वालः

54. अशुभमुखः, तत्रैव

55. पितृप्राणः, तत्रैव

56. हसुराबाबा, तत्रैव

57. पद्याराज्ञी, तत्रैव

58-62. बुभुक्षा, तत्रैव

63-64. अभिशप्तः देवदासः, तत्रैव

65-73. जिजीविषा, डा. बनमाली विश्वालः

74-82. छिन्नच्छाया, डा. रवीन्द्रकुमार पण्डाः

83-101. गङ्गे च यमुने चैव, डा. नारायणदाशः

102-112. हत्याकारी कः, डा. नारायणदाशः

113-132. उवाच कण्डुकल्याणः, डा. प्रमोदकुमारनायकः



133-134. केलिकदम्बकस्य इस्पातशिल्पम्, तत्रैव

135-142. स्वर्गादपि गरीयसी, डा.प्रमोदकुमारनायकः

143-170. कथासप्ततिः, डा. प्रमोदकुमार नायकः

## सहायकग्रन्थसूची

1. Contemporary Sanskrit Writings of Orissa, Prof. Arunranjan Mishra, Pratibha Prakashan, Delhi, 2006

2. Utkal Pratibha (Prceedngs of National Seminar), ed. Dr. Sukanta Senpati, Dr. Ramakant Mishra, Rashtriya Sanskrit Sansthan, Sadashiv Campus, Puri, Odisha, 2012-13

3. Orissan Contribution to Sanskrit Grammar and linguistics, Padmaja Prakashan, Allahabad. 2007

4. दृक् (षाण्मासिकी आधुनिक संस्कृत-साहित्य-समीक्षा-पत्रिका), दृग्भारती, प्रयाग, 1-25 अङ्काः

5. उशती (सर्जनात्मकः विशेषाङ्कः, अङ्क-5, संस्कृत-गद्य-विशेषाङ्कः, अङ्कः-6

6. कथासरित् (षाण्मासिकी संस्कृत-कथा-पत्रिका) 1-16 अङ्कः, 57 वसन्त विहार, झूसी, इलाहाबाद

7. संस्कृत वाङ्मय का इतिहास (आधुनिक-साहित्य खण्डः, सं.जगन्नाथ पाठक), उत्तरप्रदेश-संस्कृत-संस्थानम्, लखनऊ, 2000

8. संस्कृत साहित्य का इतिहास, सं.बलदेव उपाध्यायः

9. संस्कृत साहित्य रचना का इतिहास, सं. जयशंकर त्रिपाठी, इलाहाबाद

10. आधुनिक संस्कृत साहित्य का इतिहास, राधावल्लभ त्रिपाठी

11. आधुनिक संस्कृत साहित्य की सन्दर्भ ग्रन्थसूची, सं. राधावल्लभ त्रिपाठी तथा अन्ये राष्ट्रिय-संस्कृत-संस्थानम्, नई दिल्ली

12. आधुनिक संस्कृत साहित्य की सन्दर्भ ग्रन्थसूची, सं.राजेन्द्र मिश्र, इलाहाबाद

13. बीसवीं शताब्दी का संस्कृत साहित्य, राधावल्लभ त्रिपाठी, राष्ट्रिय-संस्कृत-संस्थानम्, नई दिल्ली

14. नीरवस्वनः (संस्कृतलघुकथासंग्रहः), डॉ. बनमाली विश्वाल, पद्मजा प्रकाशन, इलाहाबाद, 1998

15. बुभुक्षा (संस्कृतलघुकथासंग्रहः), डॉ. बनमाली विश्वाल, पद्मजा प्रकाशन, इलाहाबाद, 2001

16. जन्मान्धस्य स्वप्नः (अनूदित-लघुकथासंग्रहः) डॉ. बनमाली विश्वाल
17. जगन्नाथचरितम्, डॉ. बनमाली विश्वाल, पद्मजा प्रकाशन, इलाहाबाद, 2003
18. जिजीविषा (संस्कृतलघुकथासंग्रहः), डॉ. बनमाली विश्वाल, पद्मजा प्रकाशन, इलाहाबाद, 2006
19. दिशाविदिशा, केशवचन्द्रदाशः, केशवचन्द्रदाशरचनावली, प्रतिभा प्रकाशन, 2013
20. ऊर्मिचूडा, केशवचन्द्रदाशः, केशवचन्द्रदाशरचनावली, प्रतिभा प्रकाशन, 2013
21. शून्यनाभिः, केशवचन्द्रदाशः, केशवचन्द्रदाशरचनावली, प्रतिभा प्रकाशन, 2013
22. निम्नपृथिवी, केशवचन्द्रदाशः, केशवचन्द्रदाशरचनावली, प्रतिभा प्रकाशन, 2013
23. एकदा, केशवचन्द्रदाशः, केशवचन्द्रदाशरचनावली, प्रतिभा प्रकाशन, 2013
24. छिन्नच्छाया, डॉ. रवीन्द्रकुमार पण्डा, अर्वाचीन-संस्कृत-परिषद्, बडौदा
25. गङ्गे च यमुने चैव, डॉ. नारायणदाशः, कोलकता
26. हत्याकारी कः, डॉ. नारायणदाशः, कोलकता
27. उवाच कण्डुकल्याणः, डॉ. प्रमोदकुमार नायकः, भद्रक
28. स्वर्गादपि गरीयसी, डॉ. प्रमोदकुमार नायकः, भद्रक
29. कथासप्ततिः, डॉ. प्रमोदकुमांर नायकः, भद्रक
30. आधुनिक काल का संस्कृत गद्य, कलानाथ शास्त्री, राष्ट्रिय-संस्कृत-संस्थानम्, नई दिल्ली
31. लघुकथासंग्रहः, सम्पादक- जयमन्त मिश्र, साहित्य अकादमी, दिल्ली, 1997
32. संस्कृत साहित्य-बीसवीं शताब्दी, राष्ट्रिय-संस्कृत-संस्थानम्, नई दिल्ली, 1998
33. संस्कृत-लघुकथाविशेषांक, संस्कृतमञ्जरी, 9-2, 1999
34. दूर्वा 3-1, मध्यप्रदेश संस्कृत अकादमी, भोपाल, म.प्र.(विश्वकथाविशेषाङ्कः)
35. सागरिका, 28-4, 34-1, 34-3 सागर, म.प्र. (आधुनिक संस्कृत-साहित्य-संगोष्ठी-विशेषाङ्कः)
36. आधुनिक संस्कृत लघुकथाएँ: स्थिति और प्रवृत्ति, अर्चना तिवारी, पद्मजा प्रकाशन, 2011
37. सम्भाषणसन्देशः स्पशकथाविशेषाङ्कः, टुप्कथाविशेषाङ्कः, बैंगलूर
38. Significant facets of Modern Sanskrit Literature, Ed. R.K. Panda, Baroda, 2011
39. Modern Prose Literature in Sanskrit, Ed. R.K. Panda, Baroda, 2011

❖



# वेदाङ्गानामनुशीलनम्

गणेश त्रिपाठी

विदन्त्येव विपश्चितो यत् सर्वेषां ज्ञानविज्ञानानामाश्रयस्वरूपाः चत्वारो वेदा वर्तन्ते। वेदान् विहाय न किमपि ज्ञानं जगति तले क्वचिदपि प्रसृतमस्ति। सर्वज्ञानात्मका वेदा इति मनुनोक्तम्। अस्य महतो वेदस्यानेकशाखोपबृंहितस्य प्रदीपवत्सर्वार्थावद्योतकस्य सर्वज्ञकल्पस्य सर्वशास्त्रोपजीव्यत्वं निश्चप्रचं विदुषाम्। वेदमेवाधारीकृत्य सर्वैः शास्त्रैः स्वप्रतिपाद्यानि प्रमाणपुरस्सरं प्रतिपाद्यन्ते। तथाहि भर्तृहरिणोक्तम्–

**तस्यार्थवादरूपाणि निश्रित्य स्वविकल्पजाः।**
**एकत्विनान्द्वैतिनां च प्रवादा बहुधा मताः॥**

भारतीयवाङ्मये वेदानां स्थानं सर्वोपरि वर्तते। वेदा एव धर्ममूलम्। लौकिकव्यवस्थायां माध्यमिकव्यवस्थायां च वेदाज्ञानुल्लङ्घनीया चास्ति। अस्मिन्नपि विषये लोकोऽयं यदा संदिहानो भवति तद्विषये यदि प्रमाणतया श्रुतिरुदीयते तदा श्रुतिविरुद्धस्तर्कः केनापि उपस्थापयितुं न शक्यते अर्थात् वेदोक्तनिर्णयः अन्तिमः सर्वमान्यश्च भवति। अत एव तन्मर्यादारक्षणार्थं तदुद्धारार्थं च स्वयं भगवतावतीर्यत इति समेषाम् आस्तिकानां विश्वासः। श्रीमद्भागवते स्पष्टमुक्तं यद् भगवता नारायणेनादौ ब्रह्मणो हृदये वेदानां प्रकाशः सविस्तारं कृत इति। परन्तु साम्प्रतं वेदानां वेदाङ्गानां च विषये सन्ति अनेकाः विप्रतिपत्तयः। किं वेदस्वरूपम्? वेदः पौरुषेयोऽपौरुषेयो वा। यदि वेदोऽपौरुषेयः तर्हि शिक्षादीनां सादित्वेन वेदानां च अनादित्वेन तयोरङ्गाङ्गिभावो न सम्भवति तथा सति 'वेदाङ्गानि षडेव तु' इत्यादीनि शिक्षावचनानि विरुद्ध्यन्ते। अतस्ताः विप्रतिपत्तीः परिजिहीर्षुभिः वेदाङ्गस्वरूपप्रतिपादनं ग्रन्थोक्तरीत्या कृतमस्ति।

## वेदस्वरूपम्

तत्र वाक्यार्थज्ञानं प्रतिपदार्थज्ञानस्य कारणत्वेन प्रथमं तावद्वेदस्वरूपं सम्प्रधार्यते। तथाहि–सामान्यजनानामियमवधारणा वरीवर्ति यद् वेदाः पुस्तकरूपा इति। किन्त्विय-मधारणा त्रुटिपूर्णा, यतो हि वेदा एतादृशशब्दसमूहरूपाः ये किल गुरुमुखान्निर्गत्य

परम्परया शिष्याणां श्रोत्रपथम्प्रविशन्ति। उपनयनानन्तरं शिष्यो गुरुकुलं गच्छति। तत्र च सः परम्परागतविद्यानां प्राप्त्यर्थं गुरोः पुरस्ताद् उपस्थाय विनयेन प्रार्थयते। स्वभावतो हितैषित्वाद् गुरुः शिष्याय वेदविद्यां प्रददाति। शिष्यस्य विनयसहितजिज्ञासायाः गुरोरार्द्रतासहितकल्याणदृष्टेश्च अयम्परिणाम आसीद्यत् शिष्यवर्गो विद्योपार्जने कठोरं परिश्रमं विदधाति स्म। अनया प्रणाल्या कण्ठस्था वेदविद्या गुरुभिः शिष्येभ्यः प्रदत्ता। इयमेव वेदविद्यायाः परम्परा। कालक्रमेण शिष्याणां धारणाशक्तेः ह्रासं दृष्ट्वा वेदानाम् आनुपूर्व्या निःसन्दिग्धतासम्पादनार्थं वेदाक्षराणां लेखनशैली प्रारब्धा। अत एवानुपूर्व्याः सन्देहावस्थायां परम्परानुसारिलेखबद्धपाठस्य स्मारकत्वप्रकारः प्रचलितः परन्तु इदमवश्यं ज्ञातव्यं यत् लिखितपुस्तकं न वेदरूपम्, किन्तु परम्पराप्राप्तः कर्णपथगामी यः शब्दसमूहः स एव वेदः। अन्ये तु विद् धातोः ज्ञानार्थकत्वेन ततः 'भावे' इति सूत्रेण घञ् प्रत्यये कृते वेदशब्दस्य निष्पद्यमानत्वेन ज्ञानं ज्ञानरशिर्वा वेदपदार्थः। अत एव मनुनोक्तम्–

**यः कश्चित् कस्यचिद्धर्मो मनुना परिकीर्तितः।**
**स सर्वोऽभिहितो वेदे सर्वज्ञानमयो हि सः॥**

## वेदाङ्गविवेचनम्

अयं च वेदोऽपौरुषेयः। अपरश्च यः प्रश्नः पूर्वं समुद्भावित आसीद्यत् वेदानामपौरुषेयत्वे सादीनां शिक्षादीनां कथमङ्गत्वमिति चेत् ब्रूमः – वेदानामनादित्वादङ्गानां च सादित्वात् साधनादीनामङ्गाङ्गिभावो विरुद्धस्तथापि शिक्षादिष्वपि प्रवाहनित्यतायाः नित्यतायाः वा सत्त्वेन तेषामपि अनादित्वाङ्गीकारेण नाङ्गाङ्गिभावव्याकोपः। तस्य च वेदस्यार्थनिर्णयाय पूर्वमीमांसोत्तरमीमांसे प्रवृत्ते। परन्तु ताभ्यामपि धर्मब्रह्मपराभ्यां पूर्वोत्तरमीमांसाभ्यां सम्यक्तया वेदार्थनिर्णयो न जात इति हेतोः वेदस्य षडङ्गानि स्वीकृतानि वर्तन्ते। तैः शब्दरूपैः षडङ्गैः पदवाक्यात्मकस्य शब्दरूपस्य निखिलज्ञान-राशेरर्थनिर्णयो भवति आञ्जस्येन। अत एव भृशं बोधयति श्रुतिरस्मान् ब्राह्मणेन निष्कारणे धर्मः षडङ्गो वेदोऽध्येयो ज्ञेयश्चेति। ऋग्यजुस्सामाथर्वभेदाद्वेदश्चतुर्विधः, स च षडङ्गः। तान्यङ्गानि च षट् शिक्षाकल्पव्याकरणनिरुक्तछन्दोज्योतिषाणि। तथा चोक्तं शिक्षायाम्–

**शिक्षा कल्पो व्याकरणं निरुक्तं छन्दसां चयः।**
**ज्योतिषामयनं चैव वेदाङ्गानि षडैव तु॥**

एषामङ्गत्वं च वेदार्थप्रतीत्यात्मकज्ञानजननोपयोगित्वेन। अत एव शिक्षादिषु



अङ्गत्वं वेदेऽङ्गित्वं च प्रकल्प्य व्यवहारः। तथा चोक्तम्–

**छन्दः पादौ तु वेदस्य हस्तौ कल्पोथ पठ्यते।**
**ज्योतिषामयनं चक्षुर्निरुक्तं श्रोत्रमुच्यते॥**
**शिक्षा घ्राणं तुं वेदस्य मुखं व्याकरणं स्मृतम्।**
**तस्मात् साङ्गमधीत्यैव ब्रह्मलोके महीयते॥**

तत्र पूर्वोक्तानां षण्णमपि वेदाङ्गानां स्वरूपलक्षणानि प्रतिज्ञातत्वात् प्रोच्यन्ते। लक्षणे ज्ञाते सति तेषां स्वरूपमुपयोगश्च स्पष्टीभविष्यतः अन्यथा वेदाङ्गानि षडिति सामान्यतो ज्ञानेन नोपयोगसिद्धिः।

**( क ) शिक्षा–**यद्यपि शिक्षाशब्दस्य ज्ञानानुकूलव्यापाररूपार्थे रूढ़ित्वात् योगाद्रूढ़िर्बलीयसीति न्यायेनान्तरङ्गत्वाच्छिक्षापदार्थो ज्ञानानुकूलव्यापाररूपः। अत एव व्याख्यातं रामरुद्रभट्टाचार्यैर्न्यायसिद्धान्तमुक्तावलीग्रन्थव्याख्याने "स्वकर्तव्यत्व-प्रकारकज्ञानं शिक्षापदार्थ" इति। तादृशार्थस्वीकारे पूर्वोक्तानां षण्णामपि वेदाङ्गानां ज्ञानानुकूलव्यापारार्थकतया विभागो नोपपद्येत। विभागो नाम स्वसमभिव्याहृत-पदार्थतावच्छेदकव्याप्यमिथोविरुद्धयावद्धर्मप्रकारकधर्मिप्रतिपादनमेव। परिष्कृतशिक्षा-त्वाङ्गीकारे तु सर्वेषामेव वेदाङ्गानां शिक्षात्वात् तत्र कृतः षट्त्वेन विभागो न स्यादुपपन्नः। तस्मादत्रान्य एव शिक्षापदार्थो वक्तव्यः। स च क इति जिज्ञासायामुच्यते शिक्षाणां तत्तद्वर्णानां स्थानप्रयत्नोच्चारणादिक्रमप्रदर्शको ग्रन्थविशेषः। अत्र शास्त्रानुसारेण वर्णानामुच्चारणविधिरुच्चारणस्थानम्प्रयत्नादयश्च वर्णितास्सन्ति। वर्णानां शास्त्रानुसारेण वर्णानुच्चारणे यदनिष्टम्भवति तद्दर्शितं शास्त्रे–

**मन्त्रो हीनः स्वरतो वर्णतो वा मिथ्याप्रयुक्तो न तमर्थमाह।**
**स वाग्वज्रो हिनस्ति यथेन्द्रशत्रुः स्वरतोपराधात्॥**

सविध्युच्चारणे त "एकः शब्दः सम्यग्ज्ञातः शास्त्रान्वितः सुष्ठु प्रयुक्तः स्वर्गे लोके च कामधुग् भवति।" उक्तं शिक्षायामपि–

**व्याघ्री यथा हरेत्पुत्रान् दंष्ट्राभ्यान्न च पीडयेत्।**
**भीता पतनभेदाभ्यां तद्वद्वर्णान् प्रयोजयेत्॥**
**एवं वर्णाः प्रयोक्तव्या नाव्यक्ता न च पीडिताः।**
**सम्यग्वर्णप्रयोगेण ब्रह्मलोके महीयते॥**

**( ख ) कल्प–**कल्पो वेदविहितानां कर्मणाम् आनुपूर्व्येण कल्पनाशास्त्रमिति वचनं कल्पसूत्रेषु प्राप्यते। संहितायां सामान्यतो मन्त्राः समाम्नाता ऋषिभिः।

यज्ञकर्मणि केषां मन्त्राणां क्व प्रयोगः कर्तव्य इति च न निर्दिष्टः। अतो मन्त्राणां प्रयोगक्रमनिर्धारणायापस्तम्बादिमुनिभिः ग्रन्थविशेषः प्रणिनायि। एवं च केषां मन्त्राणां कुत्र प्रयोग इति प्रयोगक्रमकल्पक आपस्तम्बादिमुनिप्रणीतो ग्रन्थविशेषकल्पः। तेऽपि बहवः यथायथमुपयोगा अपेक्ष्यन्ते। तेषां बहुत्वेपि सर्वेषामेव प्रामाण्यम्। विश्वेषां विविधाध्वराणां सर्वेषां संस्काराणां च विशदं वर्णनं कल्पशास्त्रेष्ववाप्यते। वेदेषु प्रतिपादितानां मन्त्राणां विविधकर्मसु विधिविनियोगार्थवादरूपेण प्रयोगः, कर्तव्याकर्तव्यविचारः, चतुर्वर्णाश्रमव्यवस्था, विविधसंस्कारादयश्च कल्पशास्त्रेणैव विमृश्यन्ते। धर्मकर्मगुणभेदाधारेण कल्पशास्त्रस्य प्रमुखाः चत्वारो भेदाः विद्वद्भिः स्वीकृताः। ते चात्र सन्ति- (क) श्रौतसूत्रम् (ख) शुल्बसूत्रम् (ग) गृह्यसूत्रम् (घ) धर्मसूत्रं चेति। सर्वेषां संस्काराणामाधाररूपं गृह्यसूत्रं धर्मसूत्रं चेति वर्तते। संस्काराः कदा करणीयाः कदा न करणीयाः के के अपेक्षितानपेक्षितसमयाः, विधयः के, अनुप्रयोगः कः, मन्त्राः के, केन प्रकारेण कर्तव्यः, कानि कानि वस्तूनि प्रयोज्यानि चैतानि सर्वाणि गृह्यसूत्रेषु धर्मसूत्रेषु च वर्णितानि सन्ति।

**(ग) व्याकरणम्**–व्याक्रियन्ते व्युत्पाद्यन्तेऽसाधुशब्देभ्यस्साधुशब्दाः अनेनेति व्याकरणम्। प्रत्यासत्त्या चासाधुशब्दावधिकसाधुशब्दकर्मकपृथक्कृतिप्रयोजननियमविशेषो व्याकरणपदार्थः। ध्वनितश्चायमर्थः प्रदीपोद्द्योतयोः। व्याकरणस्य चेदमन्वर्थनामेति वदता प्रदीपकारेणात्र योगरूढिस्स्वीकृता। शिष्टप्रयुक्तार्थविशिष्टशब्दनिष्ठ-साधुत्वज्ञापकनियमविशेषेऽर्थे। तथा च पुण्यजनकतावच्छेदकशब्दसाधुत्वबोधकः सूत्रात्मको लक्ष्यलक्षणात्मको वा ग्रन्थविशेषः। व्याकरणेन साधुशब्दाः न निष्पाद्यन्ते तथाननुभवादेव। साधुशब्दा असाधुशब्दाः वानादिकालत एव व्यवह्रियन्ते। न तावदत्रास्य निष्पादकता विद्यते किन्तु साधुत्वज्ञान एवास्य प्रयोजकतेति निर्णीयते। तथा चोक्तं व्याकरणज्ञानिना भर्तृहरिणा–

**साधुत्वज्ञानविषया सैषा व्याकरणस्मृतिः।**

**(घ) निरुक्तम्**–अस्मिन् ग्रन्थे प्रायः वैदिकशब्दानां कतिपयलौकिकशब्दानां च बहुधा निर्वचनम्प्राप्यते तत्र बाहुल्येन प्रकृतिप्रत्यया अपि निर्दिष्टाः। निरुक्तपरिशीलनेन ज्ञायते यद् यास्कमुनेः शब्दानां व्युत्पत्तिपक्ष एवाभीष्टः। तत्र कतिपयदार्शनिकाः सिद्धान्ता अपि उपवर्णिताः सन्ति। तद्यथा–भावप्रधानमाख्यातं सत्त्वप्रधानानि नामानीति यास्कोक्तं वचनम्प्रमाणीकृत्यैव वैयाकरणाः व्यापारमुख्यविशेष्यकशाब्दबोधं समर्थयन्ति। अतः शब्दानामर्थनिर्वचनात्मको यास्कमुनिप्रणीतो ग्रन्थविशेषो निरुक्तमित्युच्यते।



एतच्च व्याकरणस्यैव परिशिष्टप्रायम्। व्याकरणस्यापि प्रकृतिप्रत्ययलोपागमादेशादीनामुप-वर्णकत्वात्। बाहुलकादिसाध्यानां लोपागमविकारादीनां प्रायशस्तत्र संग्रहो विद्यते।

**(ङ) छन्दः**–लौकिकान् वैदिकांश्च वाक्यविशेषान् पदनामादिव्यवस्थापनेन नियमविशेषव्यवस्थापकः पिङ्गलादिमहर्षिप्रणीतो ग्रन्थविशेषः छन्दः। तत्र सर्वेषां वैदिकानां लौकिकानां छन्दसां व तत्तच्छन्दोविषयकाणि लक्षणानि उपवर्णितानि सन्ति।

**(च) ज्यौतिषम्**–ग्रहनक्षत्राणां गतिमधिकृत्य कृतं शास्त्रं ज्यौतिषम्। किन्नाम ज्यौतिषमिति प्रश्ने तावदिदमुत्तरम्– ज्योतींषि प्रतिपाद्यन्ते यस्मिन्नित्यर्थे 'अर्श आदिभ्योऽच्' इति सूत्रेण निष्पन्नतया ज्योतिश्शब्दो ज्योतिःप्रतिपादकम्। यद्वा 'द्योतन्ते प्रकाशन्ते ग्रहनक्षत्रादीनि अनेन' इति 'द्युतेरिषन्नदेश्च जः' इति उणादिनिष्पन्नोऽयं शब्दः। वेदाङ्गस्यास्य त्रिस्कन्धत्वं नारदेन प्रतिपादितमित्थम्–

**सिद्धान्तसंहिताहोरारूपस्कन्धत्रयात्मकम्।**
**वेदस्य निर्मलं चक्षुर्ज्योतिश्शास्त्रमनुत्तमम्।।**

सूर्यचन्द्रादिज्योतिर्द्वारा तत्तद्वेदशास्त्रादिकर्मानुष्ठानकालनिर्णयेष्टानिष्टफलप्रदर्शको ग्रन्थविशेषो ज्यौतिषं कथ्यते। अपरिमिते गगनमण्डले यानि हि तेजोमयानि बिम्बानि संदृश्यन्ते तानि सर्वाण्यपि समष्ट्या ज्यौतिषशब्देनोच्यन्ते। वस्तुतस्तु वेदानां पारमार्थिकत्वं यज्ञे निहितम्। यज्ञशब्देन ऐहलौकिकपारलौकिकयोरुभयोरपि निवेशो भवति। यज्ञसाफल्यं शुभाशुभकालाधीनम् शुभाशुभकालं च नेत्ररूपेणानेन वेदाङ्गेन विधीयतेऽतः प्रामुख्यमावहति अङ्गमिदम्। तदुक्तमाचार्यभास्करेण स्वशिरोमणौ–

**वेदास्तावद्यज्ञकर्मप्रवृत्ताः यज्ञाः प्रोक्तास्ते तु कालाश्रयेण।**
**शास्त्रादस्मात् कालबोधो यतः स्याद् वाङ्गत्वं ज्यौतिषोक्तमस्मात्।।**

वस्तुतः ज्योतिश्शास्त्रं वेदस्यैव नेत्रं नास्ति अपितु समग्रमानवजीवनस्याऽपि नेत्रं वर्तते। गर्भाधानादारभ्य अन्त्येष्टिपर्यन्तानां सर्वेषां षोडशसंस्काराणां कालनिर्धारणं अस्माभिः ज्योतिश्शास्त्रेण एव क्रियते।

यात्रा क्रयविक्रयादीनां व्यावहारिकमुहूर्त्तानां विपुलतया विधानम् अनेन शास्त्रेण क्रियते। कदा का तिथिः? कदा वा सूर्यचन्द्रग्रहणम्? इत्यपि अनेनैव ज्ञायते। पशूनां लक्षणम्, वास्तुपरीक्षणम्, रत्नचयनम्, तेषां शुभाशुभत्वमपि विधीयते। अत एव पाणिनीयशिक्षायां भगवता पाणिनिना ''ज्योतिषा मयनं चक्षुः'' इत्युक्त्वास्य शास्त्रस्य महत्त्वं प्रतिपादितम्।

लोकेऽपि वयं पश्यामः यदाधुनिकजनाः भौतिकसाधनैः सम्पन्नाः सन्तोऽपि मानसिकरूपेण अशान्ताः व्यथितेन्द्रियाश्च सन्ति। शिक्षाजीविकोद्वाहावासप्रभृतिकाः

विषयाः सर्वेषां मनसि भवत्येव, यतो हि नराः सर्वदा मङ्गलं वाञ्छन्ति। अतः मङ्गले प्रवृत्तिरमङ्गलनिवृत्तिश्च सर्वत्र प्राणिनाम् अवलोक्यते। अभिलषति च सततं समुन्नतमैश्वर्यभाजमात्मानमवलोकयितुम्।

ज्योतिश्शास्त्रं नराकाङ्क्षां सर्वथा पूरयित्वा लोकं प्रति तदीयं भाविकालं सम्यग् बोधयति। अतः सर्वेषां हितकरत्वादिदं शास्त्रं परमोपादेयमस्ति। बालकानां कृते कीदृशी शिक्षा? किदृग्व्यवसायः? कदावरोधः? कश्चावरोधः? कश्च निस्तारः? सेवा वा समीचीनतरा भविष्यति इत्येतेषु विचारप्रवाहेषु प्रवहमानानां जनानां कृते शास्त्रमिदं नौरिव तिष्ठति। वस्तुतः स्वभावानुकूलमार्गे कृतश्रमः सार्थको भवति, विपरीतदिशि निरर्थको नैराश्यजनकश्च। अतः जीवने कदा साफल्यं कदा च वैफल्यं एतत्सर्वं ज्ञात्वा प्रतिकूलप्रशमनार्थं मार्गं तथैव प्रदर्शयति यथा–घनान्धकारे स्थाने स्थितं वस्तुद्रव्यादिकं दीपसाहाय्येन दृश्यते। उक्तं च आचार्यवराहेण–

**यदुपचितमन्यजन्मनि शुभाशुभं तस्य कर्मणः पङ्क्तिम्।**
**व्यञ्जयति शास्त्रमेतत्तमसि द्रव्याणि दीप इव॥**

अत एव प्रसिद्धेयं काचन उक्तिर्विद्यते–

**न दैवं न पित्र्यं च कर्मावसिध्येन्न यत्रास्ति देशे ननु ज्यौतिषज्ञः।**
**न तारा न चारा नवानां ग्रहाणां न तिथ्यादयो वा यतस्तत्र बुद्धाः॥**

आधुनिकविज्ञानस्यानुदिनं विस्तारमवलोक्य जनानां मनसि विचारोऽयं समायाति यद् भवतु नाम ज्यौतिषस्य प्रतिष्ठा पुरा महत्तरा परमिदानीम् अस्य कावश्यकता? विज्ञानस्य प्रभावेणेदानीं मानवाः अन्तरिक्षे संचरन्ति, भूस्थाः जनाः अन्तरिक्षयानेन पिण्डान्तरं गन्तुं क्षमाः सन्ति, विज्ञानस्याऽयं उत्कर्षकालः। परन्तु यदि सूक्ष्मेक्षिकया विचार्यते तदा सुस्पष्टं दृश्यते यत् यथा यथा विज्ञानस्योत्कर्षो जायते तथा तथा ज्योतिश्शास्त्रस्यापि प्रसारो वृद्धिमुपैति। तत्कारणं यज्ज्योतिश्शास्त्रं भौतिकसुखैषिणः सर्वासां समस्यानां समाधानं लौकिकजीवने लोकसाधनेष्वेव अन्विष्यति। अत एव व्यावहारिकमेतद् वेदाङ्गम्।

**शोधसारांशः** इत्थं वर्णितानामेषां वेदाङ्गानां सर्वेषामेव वेदार्थनिश्चायकत्वेन प्रामाण्यं समानमेव। तथापि व्याकरणशास्त्रं वेदाङ्गेषु मुख्यम्। यतो हि वेदास्तदङ्गानि च सर्वाणि शब्दस्वरूपाण्येव। तथा च पदपदार्थावगमस्य व्याकरणाधीनत्वात् व्याकरणं प्रधानमङ्गम्। निर्बाधं सर्वत्र तस्य गतेः। उक्तं च भगवता भाष्यकृता पस्पशायाम्–

**प्रधानं च षट्स्वङ्गेषु व्याकरणम्। प्रधाने च कृतो यत्नः फलवान् भवति।**

❖



# कनीयान् राजकुमारः

**ग्रन्थलेखकः-प्रो. गोपबन्धु मिश्रः**
**समीक्षकः-डॉ. सुनीलकुमारप्रधानः**

अनूदितपुस्तकस्य नाम–कनीयान् राजकुमारः, रचयिता–आन्त्वान द सेंत्–एक्जुपेरी (फ्रेंचमूलम्), अनुवादकः–प्रो.डॉ. गोपबन्धु मिश्रः, प्रकाशनम्–संस्कृतभारती, गोवा, श्रीस्थल काणकोण, गोवा–403702, प्रकाशनवर्षम्–2013, पृष्ठसंख्या-128, मूल्यम्–सप्ततिः रूप्यकाणि।

अनुवादग्रन्थानां प्रणयनपरम्परायाम् एकमन्यतमं ग्रन्थरत्नं विद्यतेऽयं '**कनीयान् राजकुमारः।**' मूलतः ग्रन्थोऽयं फ्रेंचभाषायां प्रणीतोऽस्ति। एतस्य ग्रन्थस्य आस्वादनं संस्कृतसुधियः कुर्युः, तच्चिन्तनं विधाय पुनश्चानुवादकार्यं संस्कृतेनानुवादः कृतः। अवसरोप्यासीद् दैवदत्तः एव, यदा मिश्रवर्यः प्यारिस् स्थिते नुबेल् विश्वविद्यालये संस्कृतमध्यापयितुम् अतिथ्यध्यापकत्वेन तत्र गतवान् आसीत्। तस्यैवावस्थानकाले अनूदितोऽयं 'कनीयान् राजकुमारः।' कालेऽस्मिन् संस्कृतभारतीपक्षतः सरस्वतीयोजनापि समारम्भाऽऽसीत्; तद्द्वारा प्रायशः शताधिकानां देशीयविदेशीयानां ग्रन्थानां संस्कृतानुवादः सञ्जातः। एतच्छृङ्खलायामेव विद्यतेऽयं समीक्ष्यो ग्रन्थः।

अनुवादस्तु न केवलं भाषान्तरणमपितु ज्ञातस्यार्थस्य किञ्चित् प्रावीण्येन पुनःप्रतिपादनमेव। अत्र मूलभावानां संरक्षणं त्वेकं महदनिवार्यतत्त्वम् अनुवादकेभ्यः इति सुस्थिरः विमृष्टविचारः। एतत् सम्पादयितुं मिश्रमहोदयः महता प्रयत्नेन भाषाद्वयस्य (स्रोतोलक्ष्ययोः) पाण्डित्यं साधितवान् अस्तीति नास्ति सन्देहः। प्रवाहपूर्णा सरलभाषा यस्यां तद्देशस्य संस्कृतिः तथा च जीवनस्य यथार्थता वरीवर्ति एतत् प्रमाणीकुरुते यत् स्रोतो (फ्रेंच) भाषायाः मूलभावः सर्वथा लक्ष्य (संस्कृत) भाषया सुरक्षितोऽस्ति। मूलभाषायां निरूपिताऽस्ति काचिदेका अद्भुतकथा, यत्र क्वचित् एकान्तप्रान्ते कश्चन बालसखा आविर्भूतः तदनु परिचयपुरःसरं तेन सह आमोदयुतः गभीरो वार्तालापः आद्योपान्तं सहृदयानां चेतो रञ्जयति; अन्ते च तत्स्थले एव सः अन्तर्हितोप्यभवत्। इत्येते कथाक्रमाः सततं नूतनकौतूहलं जनयन्ति। मूललेखकस्य जीवनकाले तु एतस्याः रचनायाः लोकप्रियता नासीदेव किन्तु तस्मिन् दिवङ्गते सति प्रायशः सार्धद्विशते विश्वभाषासु एतदनुवादेन ग्रन्थस्य वैशिष्ट्यं सविशेषं राजते। फ्रांसदेशीयास्तु दिव्यबालकमिव राजकुमारमेनं मन्वते। स तु सत्पथे प्रेरियितुम् इह जगति आविर्बभूव इति ग्रन्थस्यावलोकनेन तथ्यमिदं स्फुटति। राजकुमारस्य यद्रूपं मुखपृष्ठे दर्शितं तत्तु

तत्रत्यानां लोकानाम् अक्षुण्णास्थायाः केन्द्रमेव।

ग्रन्थस्यास्य वस्तु किमिति जिज्ञासायां चतुर्थे भागे– 'एकदा एकस्मिन् ग्रहे एकः कनीयान् राजकुमारः निवसति स्म। सः ग्रहः तस्मात् बृहत्तरो नासीत्। सः एकं मित्रम् अन्विष्यति स्म . . . ।' इति उच्यमाना कथा इतोऽपि रहस्योद्घाटनं करोति। ग्रन्थे केचन प्रयुक्ताः विशिष्टाः 'जेरानियम् , बाओबाब, नोएल्' इत्यादयः प्रादपाः तथा च स्वस्य ग्रहस्य समीपे स्थितानां ग्रहाणां विषये राजकुमारस्य महती जिज्ञासा तत्रशमनप्रक्रियाश्चैतद्ग्रन्थं पूर्णतां प्रददाति। अत्र क्वचित् अहङ्कारी पुरुषः आत्मनः प्रशंसां विहाय किमपि श्रोतुं नैव प्रभवति। तथा च क्वापि कश्चन विचित्रस्वभावः मद्यपः सुतरां मद्यपानस्यैव लज्जां व्यनक्ति। एकत्र दीपप्रज्वालकस्य व्याजेन किमपि वास्तविकं वदति राजकुमारः–'एषः एक एव एतादृशोऽस्ति यः आत्मानं विहाय संसारे विद्यमानस्य अपरस्य विषये किञ्चिच्चिन्तयन् अस्ति।' एतत् सर्वं भावाभिव्यञ्जनेन सह प्रस्तुतीकरणेऽपि साम्यं प्रदर्शयति।

अनुवादकार्येऽस्मिन् स्वाभाविकतायाः बोधः आद्यन्तं वर्तते यतो हि अल्पसमासयुतानि पदानि सारल्येन मनसि बिम्बमुपस्थापयन्ति। एतेन रसाप्लुतः संवादः जायते। संवादमेकं द्रष्टुमर्हन्ति–'सुप्रभातम्'– शृङ्गालोऽवादीत्। 'सुप्रभातम्। विनम्रतया कनीयान् राजकुमारः प्रत्यवादीत्। अहम् एकः शृगालः– शृगालोऽवदत्। 'आगच्छ मया सह क्रीडितुम्' – राजकुमारो न्यवेदयत्। ... शृङ्गालोऽवदत्– 'मनुष्याणां पार्श्वे किमपि अवगन्तुं समयो नास्ति। ते आपणान् गत्वा पूर्वनिर्मितवस्तूनां क्रयणे व्यस्ताः सन्ति। किन्तु कुत्रापि तादृशः आपणो नास्ति, यत्र ते मित्रतां क्रेतुं शक्नुयुः।' अध्येतव्याः मर्मस्पर्शिनोऽन्येऽपि संवादांशाः। ग्रन्थानुवादकस्तु बहूनामंशानामभिनयमपि अवसरानुगुणं स्वीये फ्रांस प्रवासकाले बहुषु स्थलेषु चकार। तद् द्वारा देश-काल-संस्कृतीनां वैशिष्ट्यं संस्कृतभाषया च मुखरितम् अभवदिति मोदकरः विषयः।

सप्तविंशतिभागेषु विभक्तोऽयं ग्रन्थः चूर्णकशैल्या विरचितो विद्यते। आर्यावक्त्रादिछन्दसाम् अभावः किञ्चिन्मुक्तकं साधयति। गद्यकाव्यस्य मुक्तकविधायां समासरहिता पदावली दृश्यते। वस्तुरचनाशिल्पयोः अनुवादकस्य सफलता तु अवलोक्यते एव, कल्पनाप्रतिभायाः प्रकर्षोऽपि लक्ष्यते। समुचितं सम्पादनम् अकृत्वा एतस्य प्रकाशनं काव्याऽऽस्वादनबाधामुपस्थापयति। तत्र तत्र मुद्रणदोषा अपि काव्यत्वमपकुर्वन्ति। आग्रन्थं सुघटितग्रथिता कथा चेतोरञ्जिका। आशांसे भाविनि काले मिश्रवर्यस्य लेखनीप्रसूताः रचनाः सुरभारत्याः अनुवादशृङ्खलाम् अलङ्करिष्यन्तीति शम्।

❖